हिरण्यकेशी
चातुर्मास्य प्रयोगः

चातुर्मास्यप्रयोगगोपाळभट्टस्वरे

श्रीगणेशायनमः आदौगजाननंनत्वातथायोगेश्वरीशिवं कालंकामंपर्शुरामंपश्चाद्रूथश्चलिख्य
ते १ अक्षय्यंहवैसुकृतंचातुर्मास्ययाजिनः भवतीतिशेषः चातुर्मास्यानिनित्यानि अग्निहोत्रं
दर्शपूर्णमासौचातुर्मास्यानीतिनित्येषुपाठात् प्रतिसंवत्सरंसोमइत्यादिस्मृतेश्च तेषांसांवत्स
रिकः प्रयोगः सूत्रेस्पष्टः द्वादशाहिकप्रयोगोयथाप्रयोगश्च बौधायनसूत्रे तत्रद्वादशाहिके
प्रयोगेयथाप्रयोगंच उदगयनेआपूर्यमाणपक्षेकृत्तिकादिविशाखांतदेवनक्षत्राणामन्यतमे
रंभसमाप्ती आरंभोवा आधानोत्तरंप्रथमसंवत्सरेचातुर्मास्यानामनारंभेविप्रकृष्टेष्टिः योयज्ञवि
भ्रष्टःस्यात्तस्माएतामिष्टिंनिर्वपेदाग्नेयमष्टाकपालमैंद्रमेकादशकपालंसौम्यंचरुमितिकाम्ये
ष्टिकांडोक्ता अशक्तौतद्देवत्यपूर्णाहुतीर्वाहुत्वानुष्ठानं द्वितीयादिप्रयोगेसंवत्सरमननुष्ठानेपा

थिकृतीपूर्णाहुतिंवाकृत्वानुष्ठानं आद्येप्रयोगेगणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्ध
कूश्मांडहोमपंचहोत्रन्वारंभणीयाः द्वितीयादौपुण्याहवाचनादिनभवति अथहिरण्यकेशिचातुर्मास्य
प्रयोगः यज्ञपुरुषंध्यात्वागार्हपत्यस्यपश्चाद्दर्भेष्वासीनोदर्भान्धारयमाणः पत्न्यासहप्राणानायम्य
देशकालौस्मृत्वाश्रीपरमेश्वरप्रीत्यर्थंयथाप्रयोगपक्षमाश्रित्यऐष्टिकचातुर्मास्यैर्यक्ष्ये इतिसंकल्प्य
गणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यात्पूर्वंतदुत्तरंवाकुर्यात्
अथर्त्विग्वरणं ऐष्टिकचातुर्मास्येष्वध्वर्युंत्वामहंवृणे एवंब्रह्मादीन्वृत्वार्हयेत् चातुर्मास्यांगत्वेनकू
श्मांडैर्होष्यामि अध्वर्युः उद्धरणपक्षेआहवनीयमुद्धृत्यजुहूंस्रुवंचसंमृज्यस्मार्त्तवदाज्यंसंस्कृत्य
स्रुवेणप्रत्याहुतिंजुहोतिअसंभवेकानिचिद्ग्रहणानिजुह्वांगृहीत्वाअवशिष्टानिपात्रांतरेगृहीत्वा

२

हवनीये कूष्मांडहोमं वरदानां तं कृत्वा अग्निं परित्यज्य ततश्चातुर्मास्यान्यालभमानः पंचहोतारं स
ग्रहं होष्यामि अध्वर्युः पुनरुद्धृत्य सकृद्गृहीतेन पंचहोतारं मनसा द्धुत्य सग्रहं कृत्वाग्निं परित्यज्य २
यजमानः पुनश्चातुर्मास्यान्यालभमानोन्वारंभणीयेष्ट्या यक्ष्ये अध्वर्युः पुनरुद्धृत्याग्नीनन्वा
दधाति ममाग्ने० अद्यय ज्ञाय० इमामूर्जयथा तिथि० त्वान्वारंभणीयं हवि० पौर्णमासं तंत्रं ब
र्हिषा व्रतं वेदं परिस्तरणं नोभावग्नी कर्मणेवां० यज्ञस्य० सदने पात्राणि द्वादश कपालानि च
रुस्थालीं समेक्षणां तंडुलसंवापपात्रं अन्वाहार्यस्थालीवर्जं प्रकृतिवत् निर्वपणकाले अग्नये
वैश्वानरजुष्टं जुष्टं० पर्जन्याय जुष्टं० अग्नेवैश्वानर ह० पर्जन्य हव्यं० प्रोक्षणे देवस्य त्वा० भ्याम २
ग्नये वैश्वानराय पर्जन्याय वो जुष्टं प्रो० अंशवरणं ते यथाभागं व्यावर्त्तेथां इदमग्नये वैश्वान

रायच पुरोडाशीयान् इदंपर्जन्यायच चरव्यान् उपधानकालेद्वादशकपालानि अंतेपंचकल्वश्चिदसि

णीतोदकसहितं अपाग्ने० आदेव० ध्रुवासि पृथिवीं० स्थालीमुपधाय भृगूणा० तप्यस्वेतिस्थाल्याः परितोंगाराध्यूहनं पि

सँमंत्रंतूष्णींवा ष्टानिसमोप्यशूर्पात्पात्रांतरेतंडुलान्समोप्य पिष्टान्युत्सूय देवोव इतितंडुलानुत्पुनाति पिष्टेषपआनी

यस्थाल्यामपआनयति पुरोडाशमधिश्रित्यघर्मोसीतिस्थाल्यांतंडुलानावपति प्रथनपरिमार्जनाभि

ज्वलनभस्माध्यूहनानिनचरौ समानमाहविरुद्वासनात् आप्यायतांघृत० साग्नयेवैश्वानरायजु०

आप्यायतां० सापर्जन्यायजुष्टम० आर्द्रौभुवनस्य० नांस्थाल्यासहैवोद्वासनंचरोः वेद्यांतूष्णींहविषो

रासादनं यज० यज्ञोरुः सर्वतःश्रितोस० येतारं शं० अयंयज्ञः० विहव्यं चतुर्होता वेदनिधनादिसमा

नमाप्रधानात् अग्नयेवैश्वानरायानुब्रू ३० अग्निंवैश्वानरंयज अग्नयेवैश्वानरायेदं० अग्नेवैश्वान

रस्या॰ यन्नादो॰ पर्जन्यायानु॰ पर्जन्यंयज्ञ। पर्जन्यस्याहमन्नादः पुरस्तात्स्विष्टकृतोजयहोमः द्वादशगृही
तंगृहीत्वाग्रेणाहवनीयंपरीत्यदक्षिणतस्तिष्ठन्प्रत्याहुतिसमिधोभ्याधायविग्राहंजुहोति चित्तंचस्वाहेति
द्वादशाहुतीर्हुत्वायथेतंप्रत्येत्यपुनःसकृद्गृहीतेनतथैवप्रजापतिर्जयानिंद्रायेतित्रयोदशीं। स्विष्टकृदा
दिविरुज्यप्राशित्रं उभयोश्चतुर्धाकरणं दक्षिणाकालेहिरण्यंवैश्वानरेधेनुंपार्जन्ये सहस्रधारेउत्से अ
क्षीयमाणे तेदधतुःपृथि॰ वंचताभ्याःहिरण्यधेनुभ्यामतितराणिमृत्युं ब्रह्मणीब्रह्मणीस्थोब्रह्मणेवा
कृताधेमामाहिंसिष्टमकृतेमह्यःशिवेभवतं ब्राह्मणाइमेहिरण्यधेनू॰ देवस्यत्वा॰ णेग्नयेहिरण्यःसं
द्रायगांताभ्याममृतत्व॰ उत्तानोवामांगीरसः॰ अग्नेर्वैश्वानरस्याहमु॰ पर्जन्यस्याहमु॰ नित्याःपत्नीसं
याजाः स्वयावेदिं॰ तनोतिपार्वणपुनरालंभवर्जं सिद्धमिष्टिःसंतिष्ठते अथवैश्वदेवः वैश्वदेवेनयक्ष्ये

वृताएवऋत्विजः उदवसानंवैकल्पिकं उद्धरणपक्षे गार्हपत्यदक्षिणाग्न्योः अजस्रपक्षे त्रयाणामपि
पृथगरणीष्वात्मनिवासमारोपणंकृत्वा प्राचीनप्रवणंत्वंसंपाद्य शम्यामानेनषड्विंशदंगुलात्मकेनाहव
नीयंकल्पयित्वातत्क्षेत्रमानेनापरयोरायतनेकृत्वोद्धृत्यावोक्ष्यक्रमेणमथित्वालौकिकेवोपावरोह्याय
तनेषुनिदधाति उद्धरणपक्षेऽध्वर्युरुत्तरेणगार्हपत्यंदर्भान्संस्तीर्यदक्षिणेनाहवनीयंब्रह्मयजमाना
वुपवेश्यपात्राणिप्रयुनक्ति जुहूंस्रुवमग्निहोत्रहवणीं आज्यस्थालीमूर्णास्तुकांप्रणयनीयमिध्ममुप
यमनीःसिकताउपवेषंच पवित्रेकृत्वातूष्णींप्रोक्षणीःसंस्कृत्यपात्राणिप्रोक्ष्यजुहूंस्रुवंचसंमृज्या
न्यत्संस्कृत्यगार्हपत्येऽग्निप्रणयनान्यादीपयति सिकताश्चोपयमनीरुपकल्पयतउद्यच्छतीध्ममुप
यच्छत्युपयमनीरुपयते धार्यमाणे अग्नयेप्रणीयमानायानुब्रू३हीतिसंप्रेष्यति आहवनीयायतनं

प्राप्य अग्नेर्भस्मास्यग्नेः पुरीषमसीत्पूर्णास्त्रुकामायतने निधाय ऊर्णावंतमित्युच्यमाने यज्ञप्रतितिष्ठ॰
मद्भिः यज्ञः प्रत्यष्ठात् इतिसंभारेषुप्रतिष्ठाप्य अग्नेः कुलायमसीतिदक्षिणतउपयमनीरुपनिवपति
मनुघस्तानि॰ यजेस्त्रपस मिंधे परिस्तीर्यपरिषिच्यजुह्वांचतुर्गृहीतंगृहीत्वा दर्विहोमधर्मेणजुहोति अ
ग्निर्यज्ञंनयतुप्रजानन्मैनंयज्ञहनोविदन् देवेभ्यो यज्ञंप्रब्रूतात्प्रयज्ञपतिंतिरस्वाहा अग्नयइदं॰ वा
युर्यज्ञं॰ तिरस्वाहा वायवइदं॰ आदित्योयज्ञं॰ आदित्यायेदं॰ यज्ञोयज्ञंन॰ तिरस्वाहा यज्ञायेदं॰ जुहूं
स्रुवंचसंमृज्य द्वादशगृहीतेनस्त्रुचंपूरयित्वा सप्त ते अग्नेसमि॰ घृतेनस्वाहा इतिपूर्णाहुतिंजुहोति
अग्नयेसप्तवतइदं॰ अजस्त्रपक्षेत्वाहवनीयमपिमथित्वालौकिकेवोपावरोह्य तूष्णीं निधानं नास्ति
प्रणयनं अथाग्नीनन्वादधाति ममाग्ने॰ श्वोयज्ञाय॰ इमामूर्जंयथातिथिं॰ वैश्वदेवं हवि॰ शाखा

हरणं वत्सायाकरणानंतरंव्रतप्रवेशः देवोवः सवितापा० घ्नियाविश्वेभ्योदेवेभ्योदेवभाग०शुद्धा
अपः० ज्ञातंविश्वेभ्योदेवेभ्यः शरदो० इतिविशेषः वेदंकृत्वावेद्युत्करौकरोति इदंतस्मादुत्करश्चयत्रा
विहृतं वेदेनवेदिमितिवेद्यामविहृतंयाजमानमपि उत्करेतु वेदेनोत्करंविविदुः० सपप्रथे० चतुः
शिखंडोयुवासुपेशाघृ० कोभुव० मानोमहते० वेदेनोत्करंबृहंतमविंदन्नपृथि० तस्मिन्बर्हिः०
व्यस्तुावेदेनोत्करं० स्तंवयजुर्हरणमुभयत्राविहृतं आग्नीध्रउत्करेन्युप्तमभिगृह्यउत्करस्थंतस्मा
दुत्तरतउपविश्यगृह्णाति वसवस्त्वेत्युभयत्राविहृतं याजमानमुत्करे बृहस्पतेपरिगृहाणोत्करं०
तस्मिन्बर्हिः० इमोनराःकृणुतवेद्युत्करावेत्यवसुमंतौरुद्रवंतावादित्यवंतौवर्ष्मन्दिवो० जुष्टाव
दित्याउपस्थइमौदेवाअजुषंत०अपहतोररुरित्युभयत्राविहृतं उत्करेयाजमानंद्वितीयमंत्रे।

हि॰ या॰ प्र॰ ५ यदुद्धृंतो॰ जीवमस्याउत्करंचकृत्सा॰ देवस्य सवितुरिति खननांतं कृत्वा पुष्पितं छिन्नप्ररूढं वा बर्हिराहरति
मुष्टिसमुदायात्मकानि अयुजीयुजीवानिधनानि कृत्वा तेषां कलापत्रयं कृत्वा तूष्णीमेकैकेन शुल्बेन तूष्णी
मेकैकं कलापं सन्नह्य पुनर्मंत्रेण शुल्बं कृत्वा मंत्रेण प्रस्तर सहितं कलापत्रयमेकत्र संनह्याहरति उत्करार्थं
व मुष्टित्रयं लवनसमय एव प्रस्तरवर्जं लुनाति तत्सन्नहनोत्तरं सन्नहनं आपस्त्वेति सकृत् इंद्रस्य बां॰उ
र्वंतरिक्षं प्रेतं॰ अदित्याः सद आसीदतं देवंगमेरुः॥ अदित्या वां पृष्ठे सादयामि एवमिध्मं प्रसूमसं विंश
तिकाष्ठानां भागत्रयं कृत्वा परिधित्रयं भागत्रयेनिक्षिप्य एकैकं भागं तूष्णीं संनह्य मंत्रे त्रयोविंशतिधे
स्मृहः कृष्णोसीति सन्नह्याहरति अंतर्वेदि शाखायाः पर्णानि प्रशाख्यास र्वाणि मूलत उपवेषार्थं परिवास्य ५
।उपवेषोसि॰ विश्वेभ्यो देवेभ्यो हविः कृण्वं॰सिनः शाखामूलस्योपवेषं करोति त्रिवृत्सलाशे॰ तुमे। तस्मां

शाखायां दर्भमयं पवित्रमविदलं त्रिवृत्करोति। मूलेमूलमुपसृजत्यग्रेग्रंनग्रंथिंकरोति। ततः सा यर्ं कुते
ग्निहोत्रेउत्तरेण गार्हपत्यं दर्भान्संस्तीर्यतेषु प्रक्षालितानि सान्नाय्यपात्राणि द्वंद्वंन्यंचि प्रयुनक्ति अग्नि
होत्रहवणीं सान्नाय्यतपनीमुखामुपवेषं शाखापवित्रमभिधानीं निदाने दोहनं पिधानमयस्पात्रंदारु
पात्रंवा पवित्रेस्थो० इमौप्राणा० विष्णोर्मनसा० गांदोहपवित्रे० धतेतिसंप्रेष्यति अग्निहोत्रहवण्यांप
वित्रांर्हितायामपआनीय देवोवः० अच्छि० वसोः० आपोदेवी० आपोदेवीः शुद्धास्थेतिवा शुंधध्वं० ज्या
ये उत्तानानिपात्राणिकृत्वासर्वाभिरद्भिः प्रोक्षणीः प्रोक्षति एताआचरंति० इहैवोविश्वेदेवारमयंतुग
वइतिगाआयतीः प्रतीक्षते। ध्रुविरसि० यच्छ उपवेषमादाय। निरूढंजन्यं० श्रयध्वं इतितेनोपवेषेण
गार्हपत्यादुदीचोंगारान्निरूह्य। अप्रस्तं सामं० बिभृतां विश्वेभ्यो देवेभ्यः श्रृतंदधि। इतितेषंगारेषुसा

न्नायतपनींकुंभीमधिश्रयति। भृगूणामं॰ तप्यस्व इतिकुंभीमंगारैः परींधे। उपसृष्टांमेप्रब्रूतात् संप्रेष्यति
वसूनांपवित्रमसिसहस्रधारं। कुंभ्यांप्रागग्रं शाखापवित्रमादधाति। अन्वारभ्यवाचंयच्छतिधारयन्ना
स्ते। अदित्यैरास्नासि। अभिधानीमादत्ते त्रयस्त्रिंशोसितंतूनामितिवा। पूषासि। वत्समुपसृजति। विहा
रंगांस्त्वो॰ चारिष्टा। संप्रेष्यति। अयस्मावः प्र॰ देयं। उपसन्नांगामनुमंत्रयते। द्यौश्चेमंयज्ञं॰ धातु। दुह्यमा
नां। उत्सं दुहंति॰ दधातु। धाराघोषमनुमंत्रयते। दोग्धा हरतितं पृच्छति। कामधुक्षः॰ हि विश्वेभ्योदेवेभ्यो
हविरिंद्रियं। गंगांय॰ हितं। गोधुगाचष्टे अध्वर्युः साविश्वायुः। प्रत्यृच्य। देवस्त्वासविता॰ सुपुवा। दु
ग्धंकुंभ्यामानयति एवंपूषासीत्यादिसुपुवेत्यंतंविहारंगांचेतिप्रैषवर्जउत्तरेदोहयति यमुनांयस्यां॰
साविश्वव्यचाः इतिद्वितीयस्यांविशेषः सरस्वतीयस्यां॰ साविश्वकर्मेतितृतीयस्यांविशेषः। तिस्रोदोहयि

त्वा। बद्धुग्धि विश्वेभ्यो देवेभ्यो देवेभ्यो हव्यं॰ कल्पतां इति त्रिः संप्रेष्यति। विसृष्टवागनन्वारभ्योत्तरादो
हयति पूर्ववन्मंत्रेण तूष्णीं वा कुतस्त्वो को॰ बीभ्यां इति विप्रुषोनुमंत्रयते। द्यौश्चेमं॰ धातु इति सान्नाय्यम
नुमंत्रयते दोहनं संक्षाल्य। संपृच्यध्वं॰ तये। इति संक्षालनं सान्नाय्यकुंभ्यामानयति। सुश्रृतं श्र
पयित्वा तूष्णीकेन सर्पिषाभिघार्य। दृंह दृगा दृंहं॰ रिषत्। इति कर्षन्निव प्रागुदगुद्वासयति यावत्कुं
भीबुध्नं शीतं भवति तावत्सतीक्षते। सोमेन त्वा॰ म्नि विश्वेभ्यो देवेभ्यो दधि। इत्याम्लेन दध्नातनक्ति य
ज्ञस्य संतति॰ तनोमि। इत्यग्निहोत्रोच्छेषणं कुंभ्यामानयति। आपो हविःषु॰ एवमस्मिन्यज्ञे यजमा
नाय जाग्रत इत्यपिधानार्थं पात्रं पआनीय। अदस्तमसि॰ शेरते इति तेनोदन्वतापिदधाति। य
द्यपिधानं मृन्मयं स्यात्तदा तस्मिन्तृणं काष्ठं वानुप्रविध्येत् इमौ पर्णं च॰ रक्षसि। इति कुंभ्याः शाखाप

हृ·चा·प्र·

वित्रमुन्मुच्यप्रज्ञातं निदधाति। निधानेमंत्रः। विष्णोहव्यंꣳरक्षस्व। इतिसान्नाय्यंगार्हपत्यदेशेउपरिनिदधा
ति ततः पूर्ववदन्यांꣳशाखामाहृत्यतयादर्भैर्वा। वायवस्थो० पूर्ववद्वत्सानपाकरोति। ततअरण्यस्याशनं।
परिस्तृणीत० उभावग्नीउप० प्रातरग्निहोत्रंयवाग्वाकृत्वाप्रागुदयात्तंत्रंप्रक्रमयति। कर्मणेवां० पात्रासाद
नकालेस्फ्यंचतुष्टयान्यष्टाविंशतिकपालानितिस्रस्थालीस्त्रीणिमेक्षणानिस्रुवंजुहूंवाजिनपात्रंपात्र्य
श्रीस्रुचंचमसंवा। उपभृतंएषदाज्यधानीध्रुवां। आज्यस्थालीदधिस्थालीकुटरुं पात्र्यासहाशयपात्रंआ
मिक्षावाजिनयोरुद्धरणपात्रेच प्रातर्दोहपात्राणि अरणीप्राकृतेअधिमंथनशकलंदर्भोश्च अन्वाह
र्यस्थालीवर्जंशेषाणिप्रकृतिवत्। ब्रह्मवरणं पूर्ववत्। कृतेपवित्रेदक्षायत्वेत्यादि० निर्वपणकाले अग्न
येजुष्टं० सोमायजुष्टं० सवित्रेजुष्टं० सरस्वत्यैजु० पूष्णेजु० एतानिप्रतिसंचराणिप्रतिपर्व मरुद्भ्योजुष्टं०

द्यावापृथिवीभ्यांजुष्टं० इदमित्यादि। अग्नेहव्यꣳ० सोमह० सवितर्ह० सरस्वतिर्ह० पूषन्ह० मरुत्तोहव्यꣳ
रक्षध्वं। द्यावापृथिवीहव्यꣳरक्षेथां। देवोव इत्यादि। देवस्यत्वा० भ्यामग्नयेसवित्रेसरस्वत्यैपूष्णोवोजुष्टं
प्रोक्षामिसोमायमरुद्भ्योद्यावापृथिवीभ्यां। शुंधध्वमित्यादि। अꣳशवस्थांते। यथाभागंव्यावर्त्तध्वंइति
सकृदुक्त्वाचरुपुरोडाशविवेकेनराशिद्वयंकृत्वाप्रथमराशौदेवताउपलक्षयेत् इदमग्नयेचसवित्रेच
मरुद्भ्यश्चद्यावापृथिवीभ्यांच द्वितीयराशौ इदꣳसोमायचसरस्वत्यैचपूष्णेच ततःयथाभागंव्यावर्त्त
ध्वं इतिचरुराशेःपौष्णमपछिद्यपुरोडाश्यैःसहपिनष्टि ततःअधिवपनादि उपधानकालेअपाग्न
इत्यादिसर्वेषां आग्नेयस्याष्टौकपालानि ध्रुवासीतिसौम्यस्थाली सवितुःचिदसीत्याद्यस्याष्टकपा
लवत् द्वादशाकपालानि ततःसारस्वतपौष्णयोःस्थाल्यौ। मारुतस्यसप्तकपालान्यैंद्राग्नवत् ततःप्र

हि॰चा॰प्र॰
८

तदोंहंदोहयतिनिरूढमित्यादिसंपृच्यध्वमित्यंतंऊहः सायंदोहवत्।अप्रसवंसाय॰श्रृतमितिमंत्रांतः
ततः द्यावापृथिव्यस्यैककपालं स्थाल्येककपालानांभृगूणामंगिरसांतपसातप्यध्वेत्यूहः।पिष्टानिस
मोप्यपात्रांतरेशूर्पादेवतंडुलान्समोप्यमंत्रेण हर्योस्त्वेतिपिष्टान्युत्पूयदेवोवइतितंडुलानुत्पुनातित्रिः
पिष्टेषूभयीरपआनीयस्थाल्यांघानयति जनयत्यैत्वेतिपिष्टेष्वेवपिंडंकृत्वा यथाभागंव्यावर्तध्वमि
तिमंत्रावृत्त्यापिंडानपच्छिद्य।यथा॰र्तेथामित्युक्तेमो इदंमरुद्भ्यः इदंद्यावापृथिवीभ्यां इत्युक्तमयोरे
वदेवतादेशनं यथाभागंव्यावर्तेथां इतितंडुलान्विभज्य इदंसोमाय।इदंसरस्वत्यै।इतिनिर्दिश्य।
पौष्णाव्यतिरिक्तानांकूर्माकृतिः।इदमहमितिकपालेष्वेव।आग्नेयंपिंडमधिश्रित्य।घर्मोसीतिस्था
ल्यांसौम्यतंडुलान् सावित्रंपिंडमधिश्रित्य।घर्मोसीतिस्थाल्यांसारस्वततंडुलान् पौष्णंपिष्टंस्थाल्यां

मारुतमधिश्रित्य। तप्तेप्रातर्दोहं हिंसायंदोहंतूष्णीमानयत्यामिक्षांकरोति। ततएककपालमधिश्रयति
उरुप्रथस्वेत्यादि प्रथनपरिमार्जनाभिज्वलनभस्माभ्यूहनानिनचरुषु। प्रक्षालनंनिनीय ब्रह्मन्नुत्तरोप
रिग्राहोपरिग्रहीष्यामि ब्रह्मा बृहस्पतेपरिगृहाणवेद्युत्करौस्वगा० संतु। तयोर्बर्हिषीप्रथेतां॰ सा० स्ना
णौ पृथिव्यादेव्योस्तां। देवतावर्ध० ऋतमसीत्यादिवेद्यामुत्करेवाविकृतं याजमानंवेद्यांप्रकृतिवत्
बृहस्पतेपरिगृहाणोत्कर॰ स्व० तस्मिन्बर्हिः० इत्युत्करे पुराक्रूरस्येतिसकृत् भूमीभूत्वामहिमानंपु
पुषतुस्ततोदेव्यौवर्धयेतपया॰ सि। य० प्रोक्षणीरासादये० न्नेद्ध्याज्येनदध्नाचोदे० जुहूं संमृज्यतूष्णीं
वाजिनपात्रं। उपभृतंसंमृज्यतेनैवएषदाज्यधानी ध्रुवासंमार्गादि० पूषातेबिलंविष्यत्विति द्वि: इदं
विष्णुरित्याज्यस्यैव अदितीरूणनाछिन्नपवित्रे इत्याज्यदधिरूपाल्यावादाय महीनामित्याज्यंनिरूप्य।

॥

हि·चा·प्र· ९ महीनामिति दधिस्थाल्यां दधि निर्वपति। इषेत्वा। ऊर्जेत्वा। इत्याज्यस्यैव। महीनां पयसीरुओषधीनाꣳ रसाद
दब्धेन वांचक्षु॰ स्त्वाय। इत्याज्य दधिनी अवेक्ष्य। आज्यसंस्कारकत्वात्। तेजोसि। तेजसेत्वा इत्याज्यस्यैव।
तेजसी अनुमतं। अग्निस्त इत्याज्यस्यैव। अग्नेर्जिह्वेरुः सुभुवो देवानां॰ जुषेभवतं आज्यदधिनीरुः
सत्येरुः सत्यस्याध्यक्षेरुो हविषीरुो वैश्वानरे वैश्वदेवे उत्पूतशुष्मे सत्यौजसी सहसीरुः सहमानेरुः
सहेथामरातीः सहेथामरातीयतः सहेथां पृतनाः सहेथां पृतन्यतः। सहस्रवीर्येरुस्ते माजिन्वतमाज्य
दध्नो राज्य दधिनीरुः सत्यस्य सत्येरुः सत्यायुषीरुः सत्यशुष्मेरुः सत्येन वामभिघारयामि तयोर्वां
भक्षीय आज्यदध्नोः शुक्रमसीत्यावर्त्तते। यज॰ अङ्गिराज्य दधिनी आज्यदधिभ्यामपः सम्यक्पुनी॰ ९
त्वाङ्कराभ्यामिमं॰ अध्वर्युः जुहूपभृतोश्चतुर्गृहीते गृहीत्वा पृषदाज्यधान्यां पंचगृहीतं पृषदाज्यं गृह्णा

तिपशुवत् आज्यस्थालीगतस्याज्यस्य तृतीयांशं दधन्यानीय ज्योतिरसि विश्वरूपं विश्वेषां देवानां
समित् इति पंचगृहीतं पृषदाज्यं गृह्णाति याजमानंब्रह्मणस्त्वेत्यादि सुवीर्यायत्वेति द्विः चैत्रीश्रावणीमा
र्गशीर्षीषु पृषदाज्यधान्यां द्विराज्यस्योपस्तीर्य महीनांपयोसि विश्वेषां० पृश्नियै दुग्धं इति तेनैव द्विर्द
धि गृहीत्वा तेनैव सकृदाज्येनाभिघारयति एतद्व्यतिरिक्तेषु कालेषु सर्वत्र पशुवत् प्रकृतिवद्धुवायां॥
प्रोक्षणकाले वेदिं प्रोक्ष्य उत्करोसि बर्हिषेत्वास्वाहा इत्युत्करं। बर्हिः प्रोक्ष्य। बर्हिरसि स्रुचेत्वा स्वाहा
इत्युत्करबर्हिः चमसायत्वा स्वाहेति चमसपक्षे अंतर्वेद्युभयमासाद्य दिवेत्वेत्यादि क्रमेणावर्त्तते या
जमानमप्यावर्त्तते स्रुच्यग्राणीति क्रमेणोभयोः। स्वधापितृभ्य इति वेद्यामेव। पूषात इत्युभयोः। ब
र्हिषा वेदिमित्याद्यविकृतं वेद्यामाध्वर्यवं याजमानंच उत्करेतु याजमाने विशेषः। ऊर्णाम्रदु० चतुः

ई·चा·प्र·
१०

शिरवंडोयुवास्कपेत्राघृतप्रतीकोवधु॰ सस्तीर्यमाणोम॰ समेधु॰ शिवश्वमेचाग्नश्चैधिस्योनश्चमेसुष
दश्चैध्यूर्जस्वाःश्चमेपयस्वाःश्चैधिस्रूपचरणश्चमेस्वधिचरणश्चैधीषमूर्जमित्याद्यविकृतंअनूयाजा
र्थेउल्मकेइत्याद्याजुह्वासादनान्तकृतिवत् उत्करेनविधृतीप्रस्तरश्च वेधांजुह्मासाद्यउत्करेवाजि
नपात्रंतूष्णीमासादयति उपभृतमासाद्यतेनैवमंत्रेणएषदाज्यधानी अवाहंबाधइत्यावर्त्ततेया
जमानं ध्रुवासीत्यादिनदधिस्थाल्याआसादनंयाजमानंच उद्वासनकाले इदमहमितिपुरोडाशा
नां सूर्यज्योतिरितिसर्वेषां स्योनंतइतिपुरोडाशत्रयार्थपात्र्यां एककपालार्थमन्यस्मिन्पात्रे आ
प्यायतां॰ साग्नयेजुष्टमभि॰ आग्नेयं तूष्णींःसौम्यं आप्यायतां॰ साසवित्रेजुष्ट॰ सावित्रं आप्या
यतां॰ सासरस्वत्यैजु॰ सारस्वतं आप्यायतां॰ पूष्णोजु॰ पौष्णं। तूष्णींमारुतं यत्तआत्मेत्यामिक्षां। १०

तूष्णीमेककपालं। क्रमेणोद्वासनं आर्द्रोश्रुवनस्येतिच रूणांरुभाल्लीभिः सहोद्वासनं हरं॒हेत्यामिक्षामु
द्वास्यान्यस्मिन्पात्रउद्धृत्यवाजिनंपात्रांतरउद्धृत्यतेनामिक्षामुपसिच्य अन्यस्मिन्पात्रएककपालमु
द्वासयति इराभूतिः कपालानामेव अलंकरणंनास्यामिक्षायाः देवस्त्वेत्येककपालमलंकृत्यलौ
किकेनसर्पिषाघि: एष्वंकरोति व्याहृतीभिर्हवीं॒ष्यासादयति। दक्षिणतआग्नेयविकाराणि। उत्तर
तोन्यानि। सौम्यद्यावापृथिवीयावग्नीषोमविकारौ मारुतऐंद्राग्नविकारः अन्येआग्नेयविकाराः
आमिक्षाप्रातर्दोहविकारः। वाजिनं॒सायंदोहविकारः। तूष्णींउत्करेवाजिनमासादयति यज्ञारुभ्स
र्वतःश्रिताः सर्वतोमांभूतंभविष्यछुयतां॒ शतं० मतीः। इत्याग्नेयसावित्रसारस्वतपौष्णानामभि
मंत्रणं। प्रजापतीरुः सर्वतःश्रितोस० छुयेतां॒शा० इतिसौम्यद्यावापृथिव्योः। योनः कनीय० अप

तंमरुतोभुवनान्नुदंतामहं॰ इतिमारुतस्य। यस्त आत्मापभु॰ इत्यामिक्षावाजिनयोरासाद्यमानयोः इय
मिंद्रियवीर्यमनयेंद्रायप॰ तयादेवा॰ सनेयमामिक्षामयि॰ इत्यामिक्षायाः यत्पृथिवीम॰ न्महेंद्रवाजि
नंमांधिनोतु इतिवाजिनस्य। अयंयज्ञः॰ विहव्यं। चतुर्होता पंचहोता। निर्मंथ्येनप्रचरति। अग्नेर्जनित्रम
सि अभिमंथनशकलमादायापरेणाहवनीयंबर्हिषिनिदधाति। वृषणौस्थः। प्रांचौदर्भौशकलेवदधाति
उर्वश्यसि। अधरारणीमादत्ते। पुरूरवाः। उत्तरारणिं। घृतेनाँक्ते। उभयोःसंधानदेशावाज्यस्थाल्याआज्ये
नानक्ति। आयुरसि। समवदधाति। अग्नयेमथ्यमानायानुब्रू ३ हि। संप्रेष्यति। त्रिरनूक्तायां। गायत्रंछंदो
नुप्रजायस्व। प्रथमं। त्रैष्टुभंछंदो॰ द्वितीयं। जागतंछंदो॰ तृतीयं। एतैस्त्रिः प्रदक्षिणमावृत्यततोयथा
सुखंमंथति। जातायानुब्रू ३ हि। जातेसंप्रेष्यति। प्रह्रियमाणायानुब्रू ३ हि। प्रह्रियमाणे। भवतंनः समन ११

सो॰ घनः। इत्युत्तरं परिधिसंधिमनुप्रहरति। अग्नावग्निश्चरति॰ भागधेयꣳ स्वाहा। स्रुवेणजुहोति। प्रवि
ष्टायाग्नय इदं॰ वेदं निधायेत्यादि। नवप्रयाजान्यजति। प्रकृतिवदनुमंत्रणं त्रयाणां। चतुर्थेर्धमौपभृतं
जुह्वामानीयंतेन चतुर्थपंचमषष्ठसप्तमान्यजति यजमानः। बर्हिष इदं॰ दुर्भ्य इदं॰ उषासानक्ताभ्यामि
दं॰ दैव्याभ्याꣳ होतृभ्यामिदं॰ अध्वर्युः अष्टमेसर्वमौपभृतं जुह्वांसमानयंतेत्यज॰ तिसृभ्योदेवीभ्य इ
बर्हिः प्रभृतिपंचानां शरदमित्यनुमंत्रणं उत्तरार्धेयागः नवमंमध्येयजति अग्नयेसोमायाग्नयेसो
मायसवित्रेसरस्वत्यैपूष्णेमरुद्भ्यो विश्वेभ्योदेवेभ्यो द्यावापृथिवीभ्यांदेवेभ्य आज्यपेभ्योग्नये स्विष्टकृ
त इदं॰ हेमंतशिशिरावित्यनुमंत्रणं हवीꣳष्यभिघार्यवाजिनंच पृषदाज्यधानीमंततः। नोपभृतं। आ
ज्यभागाविष्वायथाक्रमंहविषांप्रचारः। अग्निंप्रकृतिवद्यजति। सोमायानुब्रू३हि। सोमंयज। सोमायेदं॰

हि·चा·प्र·
१२

सोमस्याहं० वृत्रहाभू० सवित्रे इत्यपांशु। अनुब्रू३ हीत्युच्चैः। सवितारं उपांशु यज उच्चैः सवित्र इदं० सवितुर
हं० यन्नादो० सरस्वत्या अनुब्रू३ हि। सरस्वतीयज। सरस्वत्या इदं० सरस्वत्या अहं० यावाच मन्नाद्यं पुषे
यं। पूष्णोनु० पूषणं यज। पूष्ण इदं० पूष्णोहं दे० यापुष्टिमान्पशुमान्भू० मरुद्भ्योनु० मरुतो यज। मरुद्भ्य इ०
मरुतामहं दे० यें द्रियाव्यन्नादो भू० विश्वेभ्यो देवेभ्योनु० विश्वान्देवान्यज। विश्वेभ्यो देवेभ्य इदं० विश्वेषां
देवानामहं० प्राणैः सायुज्यं गमेयं। कृत्स्नमेककपालमवदायद्विरभिघार्य द्यावापृथिवीभ्यां इत्यपांशु
अनुब्रू३ हीत्युच्चैः। द्यावापृथिवी इत्यपांशु यजेत्युच्चैः आशयमनुपर्यस्यन्नृजुं प्रतिष्ठितमपर्यावर्त्त
यन्जुहोति। द्यावापृथिवीभ्यामिदं० द्यावापृथिव्योरहं० योभयोर्लोकयोर्ऋध्यासं भूमानं प्रतिष्ठांग
मेयमितिवा प्रत्याक्रम्य। ध्रौवाच्चतुर्गृहीतं गृहीत्वा एककपालं विग्राहमभिजुहोति। मधुश्च स्वाहा। १२

इयावी·जमानं·
तेमहें प्रयाजिनः

मधवइदं० माधवश्चस्वाहा माधवायेदं० शुक्रश्चस्वाहा। शुक्रायेदं० शुचिश्चस्वाहा। शुचयइदं० स्वि
ष्टकृदादि। आग्नेयसावित्रसारस्वतपौष्णानांविरुज्यप्राशित्रं। अविरुज्यैवेतरयोः। नाभिक्षायाः
प्राशित्रं। तस्याः पृथग्यजमानभागः। आग्नेयविकाराणामेवचतुर्धाकरणं। मात्रासहप्रथमजो
वत्सएकवार्षिकोदक्षिणा। ब्रह्मन्ब्रह्मास्मि० प्रजापतेरित्यविकृतौ। अयंगौरमृतस्यपूर्णः सहस्र
धारउत्सो अक्षीयमाणः। स० तेनगवातितराणिमृत्यं। दक्षिणतएतब्राह्मणा आयंगौः यथाभा
गमहिंसंतः प्रतिगृह्णीध्वं। देवस्यत्वा० रुद्रायगांतेनेतिप्रतिग्रहोवत्सस्यैव। ब्रह्मन्प्रस्थास्यामइ
त्यादिपृषदाज्यंजुह्वामानीयपृषदाज्यधानीमुपभृतं कृत्वासकृदतिक्रांतस्तेननवानूयाजान्यज
ति। देवान्यजेतिप्रथममनूयाजंसंप्रेष्यति। द्वितीयतृतीययोर्नप्रैषः। आश्रावणप्रत्याश्रावण

हे·चा·प्र· मात्रमेकैवेर्त्तव्यं।चतुर्थप्रभृतियजेतिप्रैषः।यज० देवायबर्हिषाइदं० बर्हिषोहं० प्रजावान्भूयासं।
१२ देवीभ्योद्वार्भ्यइदं० द्वारामहं० प्रजावान्भू० देवीभ्यामुषासानक्ताभ्यामिदं०उषासानक्तयोरहं०प्र
जावान्भू० देवीभ्यांजोष्ट्रीभ्यामिदं० जोष्ट्र्यारहं० पशुमान्भू० देवीभ्यामूर्जाहुतिभ्यामिदं० उर्जाहुत्यो
रहं० पशु० देवाभ्यांदैव्याभ्यांहोतृभ्यामिदं० दैव्ययोर्होत्रोरहं० यायुष्मान्यज्ञेन० देवीभ्यस्तिस्र
भ्यस्तिसृभ्योदेवीभ्यइदं० तिसृणांतिसृणांदेवीनामहं० यायुष्मान्य० देवायनराशंसायेदं० नराशंस
स्याहं० पशु० देवायाग्नयेस्विष्टकृतइदं० अग्नेःस्विष्टकृतोहं० यायुष्मा०उपभृतासहपृषदाज्यधान्या
व्यूहनं।प्रस्तरसमंजनंचमंत्रावृत्या।सहशाखयाप्रस्तरंप्रहरति।यथादेवतमुज्जितयः।संस्रावेणा
भिऊत्सवाजिनेनचरति।यज० पंचहोतारंव्याख्याय।अध्वर्युः ध्रौवाज्येनस्रुवंचमसंवोपस्तीर्यमा १३

भेरित्यभिमृश्य बर्हिषि विषिंचन्स्रुवेण वाजिनं गृह्णाति। पूरयित्वा नाभिघारयति। स्रुक्पक्षे उपभृतमुप
भृत्य नन्वमसपक्षे। वाजिभ्यो नुब्रूऽहि संप्रेष्यति। दक्षिणातिक्रम्याश्राव्य प्रत्याश्राविते। वाजिनो यज॥
वषट्कृते विषिंचन्स्वल्पं जुहोति। वाजिभ्य इदं० वाजिनामहं दे० येंद्रियावी भू० जेमानमितिवा अनु
वषट्कृते सशेषं जुहोति। अग्नय इदं० अग्नेरहं० येंद्रियावी० जेमानमितिवा। शेषेण दिक्षु जुहोति। दि
शः स्वाहेति पुरस्तात्। दिग्भ्य इदं० प्रदिशः स्वाहा। मध्ये। उद्दिग्भ्य इदं० स्वाहा दिग्भ्य इति प्रदक्षिणमनु
परिषिंचति दिग्भ्य इदं० नमो दिग्भ्य इत्युपतिष्ठते। प्रत्याक्रम्य उत्करपात्रस्थं समुपहूय सर्वे भक्षयंति।
यजमानः प्रथमो भक्षयत्यन्तमो वा यजमानः प्रथमपक्षे। होतरुपह्वयस्व ब्रह्मन्नुपह्वयस्व अध्वर्यवु
प० अग्नीदुप० इत्युक्त्वा। तैः प्रत्येकं उपहूत इत्युक्तो भक्षयति। वाजिनां भक्षो अवतु वाजो अस्मान्नेतः

सिक्तममृतंबलाय। सनइंद्र इंद्रियंद्रविणंदधातु मारिषामयाजिनंभक्षयंतस्तस्यतेवाजिन्वाजिभिर्भक्षंकृ
तस्यमधुमतउपहूतस्योपहूतोभक्षयामि। एवंक्रमेणहोत्रध्वर्युब्रह्माग्नीध्राभक्षयेयुः। उपहवेयजमानः।
प्रथमः सर्वेषां उत्तमभक्षणपक्षेयजमानउत्तमः। हविःशेषभक्षणादि। चत्वारः पत्नीसंयाजाः। नपार्व
णः। आमिक्षायजमानभागप्राशने। इदंहविःप्रज॰ इतिमंत्रः कपालविमोककाले। यानिघर्मइतिक
पालानां। यांघर्मेस्थाली॰ पूषस्तामपि॰ इतिस्थाल्याः। सद्धर्मेकपालमुपचिनोति॰ पूषस्तदपि॰ इत्येक
कपालस्य। ब्राह्मणतर्पणांतंसंतिष्ठते सांवत्सरिकप्रयोगपक्षेश्वोभूतेपौर्णमासेनेष्ट्वाउदवसाया
नुदेवसायवावपेत्। द्वादशाहेयथाप्रयोगेतुतदानीमेव। अध्वर्युः प्रस्तूतादैवेनसवित्रादैव्याआपउं
दंतुदीर्घायुत्वायवर्चसेइतियजमानस्यशिरोभ्युनत्ति। आर्द्रंकरोतीत्यर्थः। ततस्त्रेण्याशलल्याइक्षु १४

शलाकया वा केशान्विनायन्नग्रान्कुर्वन्। ताम्रयुक्तेन क्षुरेण निर्वर्त्तयति। छिनत्ति वक्ष्यमाणमंत्रेण।
ऋतमेव परमेष्ठि० शग्मेनास्याक्षिवर्त्तये। श्मश्रूणांतु वपनं तद्व्यतिरिक्तानांतु कर्त्तनं। सर्वेषांवा वपनं।
यज० तद्दतंतत्सत्यं० तेन राध्यासं। इति केशेषूप्यमानेषु जपति इति वैश्वदेवंपर्व अथ वरुणप्रघा
साः वक्ष्यमाणप्रकारेण विहारंसंपाद्य पात्राणि च संपाद्य। यज० अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भा
न्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ संकीर्त्य श्रीप० वरुणप्रघासैर्यक्ष्ये। वरुणप्रघासेषु प्र
तिप्रस्थातारं त्वामहं वृणे इति प्रतिप्रस्थातारं वृत्वा। पूर्ववृता एवान्ये। उदवसानं वैकल्पिकं अग्नी अग्नी
न्वा समारोप्य प्राचीनप्रवणे शम्यामात्रे वायतनेषु। अग्नी अग्नीन्वा मथित्वा स्वेस्वे स्थाने निधाय। अत्र गा
र्हपत्यादाहवनीयाद्वा प्रणयनं। अजस्रपक्षे त्वाहवनीयादेव। उभौ वक्ष्यमाणप्रकारेण स्वस्ववेद्योर्मनेकु

ऐ॰चा॰प्र॰ रुतः। ततः वेद्योर्दक्षिणतस्तूष्णींब्रह्म यजमानावुपवेश्य अध्वर्युप्रतिप्रस्थातारौउत्तरेणगार्हपत्यंदर्भा
१५ न्स्संस्तीर्य पात्राणिप्रयुङ्क्तः। अध्वर्युः स्फ्य मग्निहोत्रहवणीं शम्यासम्भिंजुहूं स्रुवमाज्यस्थालीमिध्मं
प्रणयनीयंमुपयमनीः सिकताः गुग्गुलुसुगंधितेजनं शुक्लोर्णास्तुकांपोतुद्वान्परिधीनुपवेषंहिर
ण्यंचप्रयुनक्ति। एवंप्रतिप्रस्थाताऽग्निशम्याहिरण्यवर्जं उभौतूष्णींपवित्रे कृत्वा प्रोक्षणीः संस्कृ
त्योत्तानानिपात्राणिप्रोक्ष्य जुहूं स्रुवंचसंमृज्य संमार्गानग्नावाधायाज्यं संस्कृत्य पवित्रे ग्नावा
धाय। वेदोसियेनेतिवेदौकुरुतः। ततोवेदी। उत्तरामध्वर्युर्दक्षिणांप्रतिप्रस्थाता उत्करः साधारणः
उत्तरस्यावेदेरुत्तरतो द्विपदेउत्करः तत्रवेदिधर्मानध्वर्युरेवकरोति। यज॰ इदंतस्माइतित्रिः प्रथ
ममुत्तरवेद्यांततोदक्षिणस्यांततउत्करे। वेदेनवेदिमितिवेद्योरविकृतमुभयोः। यज॰ चतुःशिखं १५

ऽयुवती सुपेशसो घृतप्रतीके भुवनस्य मध्ये। मर्मृज्यमाने महते सौभगाय मह्यं दुहाथां यज० मान्। वे
दाभ्यां वेदीं बृहत्या ववि दन्ते पृथिव्यां प्रथेतां पार्थिवानि। तयोर्बर्हिषि प्रथेतां साध्वंतरा हि स्त्राणा
पृथिव्योर्द्योस्त्वां। वेदाभ्यां वेदीं विविदुः पृथिव्यो ते पप्रथाते पृथिव्यो पार्थिवानि गर्भौ भुं बिभृतो
भुवने घ्वंतस्त तोय ज्ञो जायेते विश्वदानी इति वेद्योस्तंत्रेण उत्करे आध्वर्यवं याजमानं च वैश्वदेवव
त् देवस्य त्वेत्या घ्रक्षयोः स्तंबयजुर्हरणमविकृतं प्रति० नाप्रदक्षिणमावृत्याग्रेणोत्तरं विहारं गत्वा
ध्वर्युणा सहोत्करे निवपति यो मा हृदेति याजमानमविकृतं तंत्रेण। आग्नीध्रस्तंत्रेणाविकृतं मंत्र
मुक्त्वा प्रतिगृह्णाति तूष्णीं चतुर्थमित्यंतं कृत्वा अध्वर्युरुत्करे तृणनिधानाद्यविकृतं करोति ऋत
मसीत्यक्षयोः पूर्वपरिग्राहो। यज० बृहस्पतीपरिगृह्णीतं वेदीस्वगा० तयोर्बर्हिषी प्रथेतां साध्वंतर

हि॰चा॰भ॰ हिंस्मापोपृथिव्योर्देव्योस्त्वां अध्वर्युरुत्करे पिवृत्तमसीतिपूर्वपरिग्रहः वैश्वदेववद्याजमानं इमौन
१६ राइत्यध्वर्युर्वैश्वदेववत् प्रकृतिवत्प्रतिप्रस्थातुः अविकृतमुद्धननमुभयोः। यज॰ यदुद्धतो॰ कृतस्फ्या
भ्यामंत॰ जीवमनयोर्वेदीचकृमा॰ गामभूम्याशिवेनो विश्वैर्भुवनेभिः त्वां आध्वर्यवं याजमानं च वैश्वदे
ववदुत्करे यत्प्रागुत्तरस्मात्परिग्राहात्तदुभाभ्यांकृत्वा प्रतिप्रस्थाता विरमति अध्वर्युरुत्तरस्यां वेद्यां पशु
वदुत्तरवेदिं करोति। अध्वर्युः शम्ययोत्तरवेदिं विमिमीते उत्तरवेदिस्थानस्य पुरस्तादुदीचीनकुंबां शं
म्यां निधाय वित्तायनी मेऽसि इतिस्फ्येनोदीचीं लेखां शम्यया अभ्यंतरं परिलिखति सर्वत्र दक्षिणतः
प्राचीनकुंबां निधाय तिक्तायनी मेऽसि इतिस्फ्येन प्राचीं लेखां लिखति पश्चादुदीचीनकुंबां निधाय अ
वतान्मा नाथितं इत्युदीचीं लिखति उत्तरतः प्राचीनकुंबां निधाय अवतान्मा व्यथितं इति प्राचीं लिख १६

ति उत्तरस्यावेदेरुत्तरार्दंसाक्षक्रमेतीतेचात्वालः। तंपूर्ववत् तूष्णींपरिलिख्य ततःस्फ्यंशम्यांनिधाय
देवस्यत्वा० भ्यामाददेभ्रिरसिनारिरसि इत्यभ्रिमादाय विदेरग्निर्नभोनाम इतिचात्वालंजानुदघ्नं
त्रिवितस्तंवारवात्वा अग्नेअंगिरः इत्यभ्रिंमृद्धिप्रहरति अपउपस्पृश्य योस्यांपृथिव्यामसि इतिचा
त्वाला न्मृत्पांसून्दत्ते आयुषानाम्नेहि इतिहरति यत्तेनाधृष्टंनामयज्ञियतेनत्वादधे इत्युत्तर
वेद्यांनिवपति अग्नेअंगिर इतिद्वितीयंतृतीयंचहरति। योद्वितीयस्यांपृथिव्यामसीतिद्वितीयेमं
त्रसन्नामः यस्तृतीयस्यांपृथिव्यामितितृतीये तूष्णींचतुर्थं। यावसर्पासिं सिंहीरसिमहिषीरसि।
इत्युत्तरवेदिंकरोति उरुप्रथस्वोरुतेयज्ञपतिःप्रथतां इतिपुरीषंप्रथयति ध्रुवासि इत्युत्तरवेदिं
शम्ययासंहंति देवेभ्यःकल्पस्व इत्युत्तरवेदिंषट्त्रिंशदंगुलांकल्पयति देवेभ्यःशुंधस्व शुद्धाभि

हि॰वा॰प्र रद्भिः प्रोक्षति देवेभ्यः शुंधस्व सिकताभिरनुप्रकिरति यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्त एतेन शुं
१७ धतां पुनरेवाद्भिरवोक्षति उत्तरवेद्या उत्तरतः संलग्नां लेखां लिखित्वा तया यथा लेखायां जलं प्रवहति त
था आपो रिप्रं निर्वहत इति रेखायामपां शेषं निनयति विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञ
पतावविह्रुतं वातजूतो यो अभिरक्षतु त्मना प्रजाः पिपर्ति बहुधा विराजति इत्युत्तरवेद्यामंतान्कल्प
यति॥ चतुःशिखंडे युवती कनीने घृतप्रतीके भुवनस्य मध्ये तयोर्देवा अधि संवसंत उत्तमे नाक इह
मादयंतां इति वेदिमुत्तरवेदिं च स कृन्मंत्रमुक्त्वा संमृशति उत्तरवेद्यां मध्ये गोःपदमात्रीमश्वशफ
मात्रीं प्रादेशमात्रीं वा चतुरस्रामुत्तरनाभिं करोति। तूष्णीमग्निहोत्रहवण्यां प्रोक्षणीः संस्कृत्य प्रद १
क्षिणमनुपरिक्रामन्प्रतिदिशमुत्तरवेदिं प्रोक्षति इंद्रघोषस्त्वा वसुभिः पुरस्तात्पातु इति पुरस्तात्प्रो

क्षति मनोजवास्त्वा पितृभिर्दक्षिणतः पातु। दक्षिणतः प्रचेतास्त्वा रुद्रैः पश्चात्पातु। पश्चात् विश्व
कर्मा त्वादित्यैरुत्तरतः पातु। उत्तरतः प्रदक्षिणपरिक्रामन्प्रतिदिशं प्रोक्षति त्वष्टा त्वा रूपैरुपरिष्टा
त्पातु पश्चात्प्राक्स्रुवउपरिष्टात्प्रोक्षति दक्षिणतस्फ्येन लेखामालिख्य पूर्ववत् आपो रिप्रं निर्व
हत पूर्ववत्प्रोक्षणीशेषं निनयति दक्षिणवेद्यां प्रतिप्रस्थाता तूष्णीमायतनं करोति आहवनीये
ग्निप्रणयनान्यादीपयतः उद्धरणपक्षे तु गार्हपत्यं विभज्य उपयमनीभिरुपयच्छतः आहवनीया
त्प्रणायनपक्षे अध्वर्युरन्यहस्ते ग्निं दत्वा जुह्वां चतुर्गृहीतं गृहीत्वा दर्विहोमधर्मेण शेषं आहवनीये
जुहोति। यन्ते पावक चकृमा कच्चिदागः पूर्वो यत्सन्नपरो भवासि घृतेन त्वं तनुवो वर्द्धयस्व मामाहिं
सीरधिगतं पुरस्तात्स्वाहा अग्नये पावकायेदं० इत्येकघृतहोमं कृत्वा अग्नये प्रणीयमानायानुब्रू२

हि इत्यध्वर्युरेवसंप्रेष्यति त्रिरनूक्तायां उत्तरस्यावेदेरुत्तरेणोभौहरतः अध्वर्युः स्वायतनंप्राप्यति
ष्ठति प्रतिप्रस्थाताग्रेणोत्तरांवेदिंगत्वास्वायतनेतिष्ठति अध्वर्युरन्यहस्तेग्निंदत्वाजुह्वांपंचगृहीतंगृ
हीत्वाहिरण्यमंतर्धायाक्ष्णयोत्तरवेदिंव्याघारयतिविग्राहं सिंहीरसिसपत्नसाहीस्वाहा इतिद
क्षिणेंऽसे सिंह्याइदं॰ इतिसर्वत्रत्यागः सिंहीरसिसुप्रजावनिःस्वाहा इत्युत्तरस्यांश्रोण्यां। सिं
हीरसिरायस्पोषवनिःस्वाहा इतिदक्षिणस्यांश्रोण्यां। सिंहीरस्यादित्यवनिःस्वाहा। इत्युत्तरेंऽसे।
सिंहीरस्यावहदेवान्देवयतेयजमानायस्वाहा इतिमध्ये भूतेभ्यस्त्वा इत्यावृत्यास्रुचंहिरण्यंचो
द्धृत्य। उभौपौतुद्रवान्परिधीन्परिधत्तः। विश्वायुरसिपृथिवींदृंह। इतिमध्यमौपरिधीपरिधत्तः
यज॰ अस्मिन्यज्ञइत्यविकृतं। ध्रुवोऽसि। ध्रुवो॰ अध्वर्युप्र॰ तारो। ध्रुवक्षिदस्यंतरिक्षंदृंह। दक्षि १८

णोपरिधत्तः। यज० अस्मिन्यज्ञ० उग्रोरुद्रउग्रोह० अध्वर्युप्र० रो अच्छतक्षिदसिदिवं दृं हा। उत्त
राध्योपरिधत्तः। यज० अस्मिन्य० अभिभुवोस्यभिभूर० अध्वर्युप्र० रो। अग्नेर्भस्मास्यग्नेः पुरी
षमसि। गुग्गुलुसुगंधितेजनंशुक्लोर्णास्तुकांच एतान्संभारान्सह देवस्वेस्वे आयतने निवपतः
उर्णावितमित्युच्यमाने। यज्ञप्रतितिष्ठ० मह्युयज्ञः प्रत्यष्ठात् इतिसंभारेष्वग्नीन्प्रतिष्ठापयतः
यज० सुनज्मिवांब्रह्मणादे० ह्वेजातवेदसौ। इंधानावां सुप्र० वयंवां। यन्मेअग्ने० तेजिष्ठावां
तप० वोयावामग्नीताभिर्व० मावांदभन्वातु० अग्नेः कुलायमसि इतिदक्षिणतउपयमनीरु
पनिवपतः मनुष्वत्वानिधी० यतेयज इत्यग्नीउपसमिंधाते स्वस्वमग्निंपरिस्तीर्यपरिषिच्य
जुह्वांचतुर्गृहीतादर्विहोममंत्रेधर्मेणविग्राहमनिमुक्तीर्जुहुतः। अग्निर्यज्ञंनयतु० इत्यादि

हि॰वा॰प्र॰ पूर्णाकुत्स्यंतंवैश्वदेववत्कुरुतः एतावत्राहवनीयौ। यतः प्रणयनंस गार्हपत्यः पांशुकेवितते तं ञेहोमकालउ
१९ पस्थिते अपरेष्ववहोतव्यंनत्वेवोत्तरवेदिके॥ अग्नीनन्वाधत्तः दक्षिणविहारस्थमेवाग्निंप्रति॰ ता। अध्व
र्युरौत्तरवेदिकप्राकृताहवनीयदक्षिणाग्नीनन्वादधात्याहवनीयात्प्रणयनपक्षे। गार्हपत्यात्प्रणयनेय
थाप्रकृति। ममाग्ने॰ श्वोयज्ञाय॰ इमामूर्जयथातिथि॰ वारुणप्रघासꣳ हवि॰ अध्वर्युरौत्तरवेदिकस्यप
श्चात्स्थित्वाग्नंतराग्नीतिजपति। प्रति॰ ताग्रेणोत्तरंविहारंगत्वाग्रेणगार्हपत्यंतिष्ठन्नंतराग्नीप॰ इतिजप
ति। यज॰ अग्रेणगार्हपत्यंसमीपेतिष्ठन्सकृदेवजपति। उभौशाखेआहरतः पूर्वप्रति॰ तापश्चादध्व
र्युः इषेत्वेत्यादि। उभयोर्वत्सापाकरणसमयेयजमानस्यव्रतग्रहणं। अपरेणोभावाहवनीयौयजमा
नादक्षिणातिक्रम्यपयस्वतीरित्यादि शुन्धध्वंअपःसु॰ शतंमरुद्भ्यः शर॰ इतिप्रतिप्रस्थातुः। शतंवरुणा १९

येस्यध्वर्योः एवंसर्वत्रमरुत्पदेनप्रतिप्रस्थातुरूहः वरुणपदेनाध्वर्योः वैश्वदेववत् बर्हिषीआहरतः॥उ

त्करबर्हिरध्वर्युरेव देवस्यत्वेत्यादि यज्ञस्यघोषदसीत्यध्वर्युरेव। यत्कृष्णोरू० ततस्तांत्रिंशतिधा० भ्य

ता। तिस्रः समिधो० संनराः। उपवेषंमेक्षणं० इत्याद्युक्षयोः परिध्यभावात् अंतर्वेदिशाखायाइत्या

द्युक्षौकुरुतः। पूर्वप्रति० तापश्चादध्वर्युः। उपवेषोसि० मरुद्भ्योहविः० वरुणायहविः॥० सायंप्र

वाग्वाग्निहोत्रं। तत्रश्लोकः। प्राश्रुकेवितते तंत्रे होमकालउपस्थिते अपरेष्वेवहोतव्यंनत्वेवोत्तर

वेदिकेइति अग्निहोत्रोच्छेषणंनिदधाति। सायंहुतेग्निहोत्रेसायंदोहोदोहयतः। एताआचरंति०

इहवोमरुतोरमयंतुगावः। इहवोवरुणारमयंतुगावः विहारोगावोचोपसृष्टे अंतरेणमासंचारि

ष्टेत्यध्वर्युरेव। कामधुक्षः० ब्रूहिमरुद्भ्योहविरिं० वरुणायहविरिंद्रियं। बहुदुग्धिमरुद्भ्योदेवेभ्योह

न्य॰ बक्कुदुग्धिवरुणायदेवेभ्योह॰ सोमेन॰ ञ्चिमरुद्भ्योदधि। वरुणायदधि। विसृज्याग्निहोत्रोच्छेष
णमानयतः। प्रातर्दोहायवत्सानपाकुरुतः। आरण्याशनं। परिस्तृणीतेत्यक्षयोः। दक्षिणविहार
स्थमेवप्रतिप्रस्थातापरिस्तृणाति। अध्वर्युःस्वान्वाहितान्। उभावग्नीइत्यविकृतः सकृत्। प्रातर
ग्निहोत्रंपवाग्वाकृत्वाप्रागुदयात्तत्रप्रक्रमः कर्मणेवामित्यक्षयोः। प्रति॰ तादक्षिणविहारस्योत्तर
तः। अध्वर्युरुत्तरविहारस्योत्तरतः। अध्वर्युरेवदक्षिणविहारस्यदक्षिणतोब्रह्मयजमानयोःस
दनेकरोति। उत्तरेणगार्हपत्यमुभौस्वस्वविहारस्थानिपात्राणिप्रयुंक्तः। अध्वर्युः चत्वारिंशत्कपा
लानिकुंभीपाकपक्षेद्वात्रिंशत्। अन्यानिवैश्वदेववत्। प्रति॰ तास्फ्यमेकादश द्वादशवाकपाला
निकुंभीवा। अग्निहोत्रहवणीमैषीकंशूर्पंकृष्णाजिनंशम्यामुलूखलंमुसलंदृषदमुपलांस्रुवस

हिताः स्रुचः शमीमय्यः आज्यस्थाल्लीदधिस्थाल्लीकुटरुंपात्रीमेक्षणंवेदंप्रणीताप्रणयनंमदंतीआसि
क्षावाजिनयोरुद्धरणपात्रेप्रातर्दोहपात्राणिच ब्रह्मवरणं उभयोः पूर्वेद्युः कृतेपवित्रे अपरेणोभा
वाहवनीयोदक्षिणातिक्रम्यस्वायतनउपविशतोब्रह्मयजमानौ दक्षायत्वेत्याद्युभौप्रतिपद्येते।
प्रतिप्रस्थातुर्ब्रह्मन्नपः प्रणेष्यामीत्येतावानेवप्रैषः ब्रह्मा प्रणयतंयज्ञंदेवतावर्धयतमेताना॰
यजमानंचयत्तं ओंप्रणयत अध्वर्युरुत्तरवेदेरुत्तरतः प्रणीताः स्थापयति प्रति॰ ताग्रेणोत्तरंवि
हारंगत्वाद्वयोर्वेद्योर्मध्यउपविश्यदक्षिणाहवनीयस्योत्तरतः सादयति। अयमेवप्रतिप्रस्थातुः
सर्वत्रसंचारः। संविशंतामित्याद्युभयोः अकृतमित्यंतं मित्रस्यत्वा॰ उरुवाताय॰ मित्रस्यत्वा॰ ऊर्जं
ध॰ पयोमयि॰ अपहतं॰ एतेषणमंत्राअध्वर्योरेव। नप्रतिप्रस्थातुः। पात्र्यांनिर्वापपक्षेतु। ऊर्जंध॰

पयोम॰ अपहत॰ इत्येते त्रय एव प्रतिप्रस्थातुर्न भवंति। अन्ये सर्वे भवंत्येव। उभयबीजपक्षे उर्जं धत्स्वेत्या
दि प्रतिबीजमध्वर्योः। दशहोता पवित्रनिधानं चोभयोः। प्रति॰ ताविरमति अध्वर्युर्वैश्वदेववत्संच
संचराणि निरूप्यैंद्राग्नं निर्वपति विरमत्यध्वर्युः। ततः प्रति॰ तायच्छंतामित्यादि॰ स्ताभ्यां मरुद्भ्यो
जुष्टं नि॰ मेष्यर्थे यवान्निर्वपति त्रिः तूष्णीं चतुर्थं निरूप्तेष्वन्वोप्य। प्रति॰ विरमति। अध्वर्युः नानाबी
जं चेत्पूर्वं निरुप्तं पात्रांतरे कृत्वा तस्मिन्नेव शूर्पे मेषार्थे यवान्निर्वपति। देवस्य त्वा॰ वरुणाय जुष्टं नि॰
ततो यवान्पात्रांतरे कृत्वा पूर्वं निरुप्तं हविः शूर्पे समानीय तस्मिन्काय जुष्टं नि॰ इति व्रीहीन्निर्वपति।
सर्वे वा यवा भवंति। इदं देवानामित्याद्युभौ। नानाबीजे तु इदं दे॰ इदमु॰ स्फात्यै त्वा॰ एते त्रयो मंत्रा
अध्वर्योरावर्त्तंते। न प्रतिप्रस्थातुः स्फ्यं रवभीत्यध्वर्योरेव। वैश्वानरमित्युभयोः। स्वाहा द्यावापृथि २१

वीभ्यामित्यध्वर्योरेव। नानाबीजेतु। उर्वंतरिक्षमन्वितं अदित्यावामुपस्थे० इत्यध्वर्योरेवोहः। नैक
बीजे अग्नेहव्यंरक्षस्वेत्यादिपोष्णांतंवैश्वदेववत्। इंद्राग्नीहव्यंरक्षेथां प्रस्रुतानि। मरुतोहव्यंर
क्षध्वं। ततोध्वर्युः। वरुणह० स्व। कहव्यं० स्व। ब्रह्मन्प्रोक्षिष्यामीत्यृक्सो। ब्रह्मा। प्रोक्षतंयज्ञंदे० यतमे
ता० चधत्तं। ओंप्रोक्षतं अध्वर्युः देवस्यत्वा० भ्यामग्नयेस वित्रेसरस्वत्यैपूष्णोवरुणायकायवोजु
ष्टंप्रोक्षामिसोमायेंद्राग्निभ्यां। प्रति० ता। देवस्यत्वा० भ्यांवोजुष्टंप्रोक्षामिमरुद्भ्यः। विभागेनोत्करस्य
प्रदेशेकृष्णाजिनेआस्तृणीतः। उभाभ्यामुलूखलोंधिवर्त्तनांतेध्वर्युर्व्रीहीनवहंति। अग्नेस्तनूर भ्यां
सीत्यादि। अद्रिरसि० अवरक्षो० हविष्कृ० उच्चैः स० अद्रि० इषमा० वर्षवृद्ध० वर्षवृद्धा० प्रतित्वा० परा
पू० पराध्या० वायु० देवो० इत्यादिप्रक्षालनांतं। तुषान्प्रज्ञातान्निदधाति। ततः प्रस्रुताप्रोक्षणीशेष

हि॰चा॰प्र॰ णयवानाद्दीकृत्य। अग्नेस्तनू॰ अद्रिरसि॰ अवर॰ वर्षवृद्ध॰ वर्षवृद्धा॰ परापू॰ परा॰ नतुषोपवापः।
२२ वायुर्वो॰ देवोवः॰ देवेभ्यः॰ प्रक्षालनांतंकरोति। अध्वर्युः स्वप्रोक्षणीशेषेणयवानाद्दीकृत्य। अग्ने॰ अ
वर॰ वर्ष॰ वर्षवृ॰ प्रति॰ परा॰ परा॰ वायु॰ देवो॰ देवेभ्यः॰ २ प्रक्षाल्यफलीकरणान्येकीकृत्यरुपधि
त्वा। सर्वान्स्तुषानेकत्रावभृथार्थं निदधाति। व्रीहियवतंडुलप्रक्षालनमेकीकृत्य उभौस्वस्ववेद्यांप्रक्षा
लनंनिनयतः। उभौवातस्येत्यादिमंत्रैः शवरुधांतंकुरुतः। अध्वर्युः यथाभागंव्यावर्त्तध्वं इतिचरुपुरो
डाशीयविवेकेनराशिद्वयंकरोति। पुरोडाशार्थराशौदेवताउपलक्षयेत्। इदमग्नयेचसवित्रेचेंद्रा
ग्निभ्यांचकायच। ततश्चर्वर्थराशौ। इदंसोमायचसरस्वत्यैचपूष्णेच ततोयथाभागंव्यावर्त्तध्वंइ
तिचर्वर्थराशेः पौष्णमपछिद्यसहपुरोडाशैः पिनष्टि। उभौदेवस्यत्वेत्यादि। अश्मवकिरंतीतिप्रैषोध्व २२

योः प्रथमबीज एव नद्वितीयबीजे। नप्रतिप्रस्थातुः। अन्यत्सर्वमुभयत्रयवानां अत्रमदंतीरधिश्रय
तः। अध्वर्युर्गार्हपत्येश्रपणपक्षेदक्षिणार्धेमेष्यर्थंस्थलमवशिष्यधर्मस्थिरसीत्यादिपौष्णांतंवैश्वदे
ववत्तदुपधाय ऐंद्राग्नस्यप्रकृतिवदुपधायविरमति ततः प्रतिप्रस्थातादक्षिणार्धेगार्हपत्यस्यैका
दशद्वादशवाकपालान्यैंद्राग्नवदुपदधाति यथामेष्याः कपालसंयोगोभवति त्रिषुत्रिषुकपा
लेष्वेकैकः पादः तत्रद्वेसंलग्नेउपधाय किंचिद्व्यवधानेनतृतीयचतुर्थेसंलग्ने तृतीयचतुर्थ
योर्दक्षिणतः संलग्नंपंचमं प्रथमद्वितीययोर्दक्षिणतः संलग्नंषष्ठं। प्रथमस्योत्तरतोव्यवधाने
नसप्तमं। चतुर्थस्योत्तरतोव्यवधानेनाष्टमं। सप्तमस्यपुरस्तात्संलग्नेद्वे। अष्टमस्यपश्चात्संलग्ने
द्वेप्रागपवर्गे। एवंद्वादश एकादशपक्षेअष्टमस्यपश्चादेकमेवसंलग्नं। तदाचतुर्थः पादोद्वयोः क

पाल्लयोः। एवंसर्वेषांमेषीसंयोगः। प्रतिप्रस्थाताविरमति। अध्वर्युः मेषायामाग्नेयवदुपदधात्यष्टौ तत्र त्रि
षुत्रिषु कपालेषुपादद्वयं। तत्रप्रागपवर्गे द्वेसंलग्ने। तयोः प्रागेकंव्यवधानेन। तृतीयाद्व्यवधानेनदक्षि
णत एकंमहत्। प्रथमस्यदक्षिणतोव्यवधानेनैकंमहत्। प्रथमद्वितीययोरुत्तरतःसंलग्नंषष्ठं। तृती
यस्योत्तरतःसंलग्नेसप्तमाष्टमे। एवंसर्वेषांमेषसंयोगः कुंभीपाकपक्षेस्थालीवत्कुंभ्योः। ततउभौ
प्रातर्दोहौदेवताक्रमेणदोहयतः सायंदोहवत्संक्षालननिनयनांतं ततोध्वर्युः कायायैककपाल
मुपदधाति। संवापादिप्रतिपद्येते। अध्वर्युणाव्रीहिपिष्टानांतंडुलानांचसंवापेकृतेउभौदेवता
क्रमेणयवपिष्टानांसंवपनेकुरुतः। क्रमेणात्सूयस्समापद्इति क्रमेणपिष्टेघ्रपआनयतः स्थाली
ष्वानयत्यध्वर्युः। कुंभीपाकपक्षेकुंभ्योरानयतः। अद्भ्यः परि॰ समद्भि॰ तनयस्ये॰ मखस्य॰ एषां २३

चतुर्णांनानाबीजपक्षआवृत्तिरध्वर्योः पिंडेकृतेयथाभागंव्यावर्त्तध्वं इति त्रिरुक्त्वापिंडत्रयमप
छिद्ययथाभागंव्यावर्त्तेथामित्यवशिष्टौ। तयोरेवंदेवतादेशः इदमिंद्राग्निभ्यां। इदंकाय। यथाभा
गंव्यावर्त्तेथांइतिचर्वर्थान्। इदं सोमाय। इदं सरस्वत्यै। इदमहमित्यादि। ऐंद्राग्नपर्यंतानधिश्र
यति। ततउभौयवपिंडयोर्मेषीमेषंचकुरुतः। पश्चात्तामेष्याः योनिंस्तनौचकरोति। अध्वर्युर्मेष
स्यशिश्नंवृषणौशृंगेचकरोति पश्चात्तामेषीमेकादशसुद्वादशसुवाकपालेष्वधिश्रयति। अध्व
र्युरष्टसुमेषं अथयजमानःपत्नीचलौकिकयवपिष्टानिपात्रांतरेतूष्णींसमोप्य इषदुपतप्यत
त्ताभिरङ्गिरनुपरिप्लाव्यमेक्षणेनसंयुत्यतेषांपिष्टानांप्रेष्यामात्यसस्त्रीकसंख्यान्येकातिरि
क्तानिकरंभपात्राणिदीपाकाराणिकुरुतः तत्रप्रेष्यामात्यशब्देनभृत्यपुत्रपौत्रशिष्याः। अप्रत्त

कन्याश्चोच्यंते। तस्य योः प्रातर्दोहयोः क्रमेण सायंदोहावानयतः। ततोध्वर्युः कायमधिश्रयति। प्रथना
दिवैश्वदेववत्। मेषीमेषयोरवयव विघातो न भवति तथा प्रथनं कर्त्तव्यं कुंभीपाकपक्षे घर्मोसि विश्वायु
रितिमेष्याअधिश्रयणं। घर्मोसीतिमेषस्य। उभयोरन्यत्सर्ववत्। अविदहंतेत्यध्वर्युः। प्रक्षालननिर्णे
जननिनयनं स्वस्ववेद्यामुभयोः। उभौ ब्रह्माणमामंत्रयते। वैश्वदेववदध्वर्युः प्रकृतिवत्प्रस्थाता। ब्रह्मा
बृहस्पतीपरिगृह्णीतं वेद्युत्करान्स्तृणा० संतु। तेषु बर्हीं॑षि प्रथंतां॑सा० स्त्राणाः पृथिव्यो देव्यः संतु। देव
तावर्धयतमेताना० धत्तं। ओं परिगृह्णीतं। वसवस्त्वेत्यादि सहैव वेद्योः। पश्चादुत्करेध्वर्युः। पूर्वपरिग्र
हवद्यजमानं। भूमयो भूत्वा महिमानं पुपुषुस्ततो देव्यो वर्धयंते पयां॑सि। य० रीश्वा। धा असीत्यावर्त्त
ते। पुराक्रूरस्येतितंत्रेणाध्वर्योः प्रकृतिवत्प्रस्थातुः। प्रोक्षणीरासादयतिवैश्वदेववदध्वर्योः। पत्नीं॑ २४

सन्नह्येतिवर्जंप्रस्तातुः।पात्रसंमार्गस्यस्वकरणेसहैवकुरुतः।अध्वर्युरेवपत्नीं सन्नह्यति।पत्न्याउभ
योराज्यदध्यवेक्षणंतंत्रेण।महीनांपयोऽसि ओषधीनां रसा अदब्धेनत्वाचक्षुषावेक्षे सुप्रजास्त्वाय।
अन्यदुभयोर्वैश्वदेववत्।आज्यदधिनीरूढ इति स्वस्ववेद्यामुभायवेक्षणेकुरुतः।यजमानः मंत्रावृत्त्या।
उत्तरेअवेक्ष्यदक्षिणेअवेक्षते।अथवातंत्रेणबहुवचनांतेनमंत्रेण आज्यदधीनिरूढसत्यानिरूढस
त्यस्याध्यक्षाणिरूढहवींषिरूढवैश्वानराणिवैश्वदेवान्युत्पूतशुष्माणिसत्यौजांसिसहांसिरूढसह
मानानिरूढसहध्वमरातीःसहध्वमरातीयतःसहध्वंपृतनाःसहध्वंपृतन्यतः।सहस्रवीर्याणिरूढता
निमाजिन्वताज्यदध्नामाज्यदधीनिरूढसत्यस्यसत्यानिरूढसत्यायूंषिरूढसत्यशुष्माणिरूढसत्येनवो
भिघारयामितेषांवोभक्षीय।अद्भिराज्यदधीन्याज्यदधिभिरपः० शान्त्यैरिमंयज्ञं० इतिमंत्रेणसह

हि·चा·प्र·
२५

त् एषदाज्यवंत्याज्यानिपश्चुवद्गृहीतः।श्रावण्यांतुसकृदाज्यस्योपस्तीर्यद्विर्दधिगृहीत्वाद्विराज्येनाभि
घारयतः।यजमानः।पंचानांत्वावातानां० पंचानांत्वामृतूनां० पंचानांत्वांदिशां० पंचानांत्वांपंचज० चरो
र्वांपंच० ब्रह्मणोवांतेज० क्षत्रस्यवामोज० विशेत्वांयं० सुवीर्यायत्वां० इतिद्वि।सुप्रजास्त्वायत्वां० राय
स्पोषायत्वां० ब्रह्मवर्चसायत्वां० भूरस्मा० देवानांत्वांदे० अपोऽद्ध्येत्यादि।ब्रह्मन्प्रो३क्षिष्यामीत्युक्तःस्यौः
प्रोक्षतमितिपूर्ववद्ब्रह्मणः।अध्वर्युर्वैश्वदेववत्।उत्करबर्हिषिप्रोक्षति।उत्करबर्हिर्निस्रुग्भ्यांत्वेतिचम
साभ्यांत्वेतिवाविशेषः।पश्चात्ताप्रकृतिवत्।यज० अग्निश्रेमबर्हिषीअंतः० इतिवेदिबर्हिषोरासाद्य
मानयोः।अविकृतमुत्करबर्हिषः।स्कमनसइत्यविकृतंसकृत्।उत्करबर्हिष्यावृत्तिः।ऊर्णाम्रदुनीप्रथमा
नेस्योनेदेवेभ्योजुष्टेसदनाभ्यांबर्हिषी।स्रुव० हिधत्तंमां० चतुःशिखंडेयुवतीसुपेशसौघृतप्रतीकेवयु २५

नानि वसाते। तेस्तीर्यमाणे महते सौभगाय ते मे दुघ्रार्थां यज॰ शिवे च मे शग्मे च स्तं स्योने च मे सुषदे च
स्तमूर्जस्वत्यौ च मे पयस्वत्यौ च स्तं सूपचरणे च स्तं मेधि च रणे च स्त भिषमूर्जं मे पिन्वतं ब्र॰ न्वतं क्षत्र॰ न्व
तं विशं॰ न्वत मायु॰ न्वतं प्रजां॰ न्वतं। अध्वर्युः पुनर्देव बर्हिरिल्फ़ल्करे। वैश्वदेव व द्याजमानं। विछिनद्भि
विधृतीभिः सप॰ यंत्रा भि र्विधि॰ विशो यंत्रा नुदमाना॰ सीदंत्यो देव्यः सुकृतस्य लोके धृतय रु विधृतयः
स्वधृतयः प्राणा॰ यत प्रजां॰ यत पश्वू॰ यत। इमौ प्रस्तरा वुभय यस्य धर्त्तारौ धर्त्तारौ प्रया॰ नां। तौ दध
तुः सभि॰ रूपा स्तयोः स्क चो॰ आरोहतं पथो जुह्वो देवयानान्य॰ हिरण्यपक्षे अजिरे संभृतां गे वहाथो
मासुक॰ जुह्वो रुरोघृता च्यो गा यत्रियाम्यो क विषाणे॰ अव्यथमाने यज्ञमनु यछेथां स्तं सुनी त्यो यज्ञं
नयाथ उप॰ अवाहं बाध उपभृ द्यां स्तं सप॰ दो है यज्ञो सुदु॰ सुभृतो रु उपभृ तो घृता च्यो त्रै ष्टु॰ वेदसो।

हि·चा·प्र· अव्यथमानेयज्ञ॰नयाथउप॰ अघाहंबाधउपभृद्ध्या मितिपुनः पृषदाज्यधान्योः। योमावाचा॰ मधरं
२६ ध्रुवयोरह॰ ध्रुवेस्थोधरुण्योधनस्यपूर्णेजा॰ वेदसो। अव्यथमाने॰ स्योनौमेसीदतं सुषदौ पृथिव्यां
प्रथयतंप्रज॰ दिविसीदतंपृथि॰ इमौस्रुवावभिजिह्नतोहोमान्छतस्प्रैरोछंदसा॰ समंक्ताविष्णा॰ इमेस्था
ल्योघृतस्यपूर्णेअछिन्नपयसोशतधारावुत्सौ। एताअसदन्नित्यादि। तूष्णींसौम्येंद्राग्न्योरभिधा
रणं। अन्येषांमंत्रेण यस्तआत्मस्यामिक्षे। प्रस्थातातूष्णींमेषीं। अध्वर्युर्मंत्रेणमेषं। इदं हेस्कसावामि
क्षेउद्वासयतः। उभौआमिक्षेसंहतेअन्ययोःपात्रयोरुद्धृत्यवाजिनाभ्यामुपसिंचतः। अध्वर्युर्वारु
णींकुंभ्यांनिष्कासमवभृथार्थमवशिनष्टि। ततः प्रस्थाता। आर्द्रंपथस्तुर्भुव॰ भृतोत्स्नातिजनित्रीम
तीनां इतिमेषीमुद्वास्य। कुंभीपाकपक्षेतुप्रथस्तुपदंलुप्यते। यवमयानांतस्मिन्सीदेतिमंत्रोलुप्यते॥ २६

अध्वर्युर्मेषमुद्वास्य कायमुद्वासयति। ऐंद्राग्नपर्यंतानलंकृत्य। प्रस्तोता मेषीमलंकरोति। तामनैडकीभि
रूर्णाभिः कुशपुष्पैर्वा लोमशां करोति। अध्वर्युर्मेषमलंकृत्यैव लोमशं करोति। ततः कायमलंकृत्य तत
स्मिन्नभूतमाज्यमानीयाविः पृष्ठं करोति अध्वर्युर्मारुत्यामिक्षायां मेषमवदधाति प्रस्तोता वारुण्यां
मेषीं। अथाभ्यां शमीपर्णकरीराण्युपवपति परःशतानि भवंति परःसहस्राणि वा। तत्तत्पात्रे संक्षिप
ति। करंभपात्रेषु फलान्यन्वोप्य। अध्व० हैव्योतिभिरष्टौ हवींषि उत्तरस्यां वेद्यामासादयति आग्नेय
विकारान्दक्षिणतः। अन्यानुत्तरतः। प्रस्तोता ऐषीके शूर्पे करंभपात्राणि स्थापयित्वा मारुत्या सह दक्षि
णवेद्यां व्याहृतिभिरासादयति। वाजिने च व्याहृतिभिरुत्करे आसादयतः। अत्र मेषप्रकृती विनिमये
नहरतः। मारुत्यामिक्षायां मेषीमवदधाति। वारुण्यां मेषं। यज० यज्ञाः स्थ सर्वतः० आग्नेयसावित्र

सारस्वतपौष्णमेषकायानांतंत्रेण। प्रजापतिरसि० सौम्यस्य। योनः कनीय० ऐंद्राग्नस्य। यस्तआत्मेतितं
त्रेणामिक्षयोः इयमिंद्रियमितिमारुत्याः। योनः कनीय० अपतंमरुतोभुवनांनुदंता० इतिमेषी। इयमिं
द्रियमितिवारुण्याः। अयस्तआत्मेतिवाजिनयोः येपृथिवीमन्वरतांयेप्रविष्टेयाभ्यामसिंच० पतिः। इ
मेतेभुत्रेमधुनीवाजिनीवतीयाभ्यामुपरिष्टा० हेंद्रंवाजिनेमांधिनुतां। इतिवाजिनयोः। अयंयज्ञः सम०
सर्वेषां। सौम्यस्यविहव्यंन्वतुर्होता। अन्येषांपंचहोता। असंभवतांमंत्रावृत्तिः। वैश्वदेववन्निर्मथ्येन
चरतः। अथवाध्वर्योरेवनिर्मथनं विभज्योभौप्रहरतः। अभिजुहुतश्च। अयंवेदइत्याघस्रयोः अ
ध्वर्युरेवहोतारमामंत्रयते। पौष्णांतंवैश्वदेववदुक्त्वा इंद्राग्नीमरुतोवरुणः कइतिप्रधानदेवताः वैरा
जस्विष्टकृत्। वैश्वदेववदन्यत्। अग्नयेसमिध्यमानायानुब्रूर्हीत्यध्वर्योरेव। प्रणवेप्रणवेसमिध २

मित्याघ्नभौकुरुतः। समिद्धो अग्निरिति सकृदविकृतं। प्रजापतये मनवइदं० मनसीरूः प्राजापत्ये मनसा
माभूतेनाविशतं। अग्नीसरिधीनित्यविकृतमध्वर्युरिव। आग्नीध्र उत्तरविहाररूस्फ्ये ध्मसन्नहनैरुत्तरा
ग्निपरिधीनग्निंच संमृज्य स्फ्ये ध्मसन्नहनानिनिधाय। दक्षिणविहाररूस्फ्ये ध्मसहैन्नैर्दक्षिणाग्नि
परिधीन्संमृज्य विरमति। प्रस्थाताग्रेणोत्तरंविहारमुत्तरतो गत्वा स्वस्थानासीनां पत्नीं पृच्छति। पत्निकति
तेजाराः इति। सायावतः प्रब्रूयात्तान्वरुणो गृह्णातु इति निर्दिशति। प्रस्थाता जारैकत्वे द्वित्वे वातं ताविस्यू
हः। जाराभावे न वरुणनिर्देशः। जारकथनेतु तेनैव प्रायश्चित्तमितिवदंति। कर्मसमाप्तौत्वन्यत्कार्य
मित्यन्ये। प्रघास्यान्हवा० सजोषस इत्युत्तरतः पत्नीं प्राचीमुदानयन्प्रस्थाता वाचयति। तामग्रेणोत्त
रंविहारमानीय द्वयोर्वेद्योर्मध्यतः प्रत्यङ्गानीय ऐषीकेश्शूर्पेकरंभपात्राण्यस्तानि पत्नीशीर्षन्नधि

हि·चा·प्र·
२८

निधायांतरावेदीप्राकूगत्वाग्रेण दक्षिणमग्निंप्रतीची तिष्ठति। यज० द्वयोराहवनीययोरपरेणोदङु:
त्याक्रम्याग्रेणोत्तरमग्निमागत्यांतरावेदीप्रविश्यप्रागगत्वापत्न्यादक्षिणतः प्रत्यङ्मुखस्तिष्ठति। मोषूणइंद्र
त्र० वंदतेगीः इतियजमानः पुरोनुवाक्यामन्वाह। यज्ञामेयदरण्य० तस्यावयजनमसिस्वाहाइतिदंप
तीतेनैवशूर्पेणकरंभपात्राणिदक्षिणेग्नौजुहुतः। प्रघास्येभ्योमरुद्भ्यइदं० अध्वर्युर्वाजुहोत्यन्वारब्धे
तेदंपती। अक्रन्कर्मकर्मकृतः० प्रेतसुदानवः इतिस्वंलोकंगच्छंतौजपतः। यथागतंगच्छतः। आग्नीध्रोद
क्षिणमग्निंसंमार्ष्टि। स्रुच्यमाघारयतः। इंद्रायेदं० वाचोरुरैंद्रोसपत्नक्षयणोवाचामैंद्रियेणावि
शतं। प्रत्याक्रम्येत्यादि। अध्वर्युरेवप्रवरंप्रवृणीते। घृतवतीशब्देजुहूपभृतावादधाते इत्यादि। आ
ज्यभागांतमुभयोर्वैश्वदेववत्। आग्नीध्रः अंगयागार्थप्रत्याश्रावणे इध्मसन्नहनसहितंस्फ्यद्वयंधा २

रयेत्। मारुतीव्यतिरिक्तप्रधाने अध्वर्योरेव स्फ्यध्मसन्नहनानि। मारुतीयागे प्रस्थातुरेव। मारुतीव्यति
रिक्तेषु अंगप्रधानयागेष्वध्वर्योरेव संप्रेषाः। मारुतीयागे तु प्रस्थातुरेव। तंत्रेणाविकृता उद्देशत्यागा अनु
मंत्रणानि च। आज्यभागांते स्रुग्घस्त एव प्रतिप्रस्थाता विरमति। अध्वर्योः पौष्णांतानां वैश्वदेववद्या
गः। ऐंद्राग्नस्य प्रकृतिवत्। अनुमंत्रणानि च। अध्वर्युः स्रुग्घस्तो विरमति। प्रस्थाता आप्यायतां० मा
भेर्मा सं० द्विः। मरुद्भ्यो नुब्रू २ हि। आमिक्षायाः पूर्वेण सहावदानेन कृत्स्नां मेषीमवद्यति उत्तमेन शमी
पर्णकरीराणि। आप्यायतां० यदवदानानि० सकृत्। अत्याक्रम्याश्राव्य प्रत्याश्राविते मरुतो यज॥
वषट्कृते दक्षिणेग्नौ प्रतिष्ठितां मेषीं आमिक्षां च जुहोति। मरुद्भ्य इदं० मरुतामहं० ज्ययेंद्रियावी द्रिया
व्यन्नादो० जेमानं महिमायनं गमेयमिंद्रियाव्यन्नादो भूयासमिति वा। ततः प्रस्थाता उदङ्ङुत्याक्रम्य

हे·चा·प्र·
२९

विरमतिस्रुग्घस्तः।अध्वर्युःस्रुच्यपस्तीर्यमारुतीवत्सञ्चरति।वरुणायानुब्रू०वरुणंयज।वरुणायेदं०वरु
णस्याहं०ऐन्द्रियाव्यन्नादो०जेमानं०मन्नादइतिवा।वैश्वदेववदेककपालेनचरति।कायइत्युपांशु।अ
नुब्रूहीत्युच्चैः।कमित्युपांशु।यजेत्युच्चैः कायेदं० कस्याहं० यान्नादो० अत्याक्रम्यध्रौवाच्चतुर्गृहीतेन।
नभश्चस्वाहा।नभसइदं० नभस्यश्चस्वाहा। नभस्यायेदं० इषश्चस्वाहा।इषायेदं० ऊर्जश्चस्वाहा।ऊर्जा
येदं०४ एककपालमभिजुहोति।स्विष्टकृताचरतः।अध्वर्युरेवसंप्रेष्यतिवषट्कृतेजुहुतः।अत्या
क्रम्यवैश्वानरइत्यक्षो।अध्वर्युःप्राशित्रमवदायेडामवद्यतिऐन्द्राग्नांतेभ्योवदायाग्रेणाग्निंपात्रंप्र
रूढेत्रप्रयच्छति।प्ररूढातातस्मिन्पात्रेमारुत्याइडाभागमवदायाध्वर्यवेपात्रंप्रयच्छति।अध्वर्युःवारु
ण्याश्चअवदायक्रमेणसर्वेभ्योहविर्भ्योयजमानभागमवद्यति।प्ररूढातांमारुत्यायजमानभागमवदा २९

य। अध्वर्युर्वारुण्याश्चावद्यति सर्वभागं अध्वर्युरेव संतप्यस्वध्रुवायाउपोहति पूर्वावदानवत् द्वितीय

मिडामवद्यतः। अध्वर्युरेवाभिघारयति प्रतिप्रस्थातुरिडाप्रत्ता ताश्चवति पर्वतिस्रेअवांतरावदाने

त्वाध्वर्युरेव। ब्रह्मव्यतिरिक्तानामन्वारंभः उपहूतः पशुमानस्मानीत्यश्नौ प्रतिप्रस्थातृषष्ठाइडां

प्राश्नंति। दक्षिणवेद्यां प्रस्थातुर्मार्जनं। अन्येषामुत्तरवेद्यामेव। सौम्यं द्राग्नवर्जितानां चतुर्धाकर

णं। इदं यजमानस्य दक्षिणासङ्घं हस्तउपहर्तवा इत्यध्वर्युरेव धेनुर्दक्षिणा सहस्रधारोत्साक्षीयमा

णा। सादाधारए० दिवं चतयाधेन्वातितराणि मत्स्यं। ब्रह्मणी ब्रह्मण्यसि ब्रह्मणेत्वा० रुद्रुतामत्यं शि

वाश्चव। प्रजापतेरित्यविकृतमुभयोः। केचिदूहमिच्छंति। प्रजापतेर्भागा स्यूर्जस्वती पयस्वती प्राणा०

क्षितास्य० दक्षिणासङ्घ इत्युच्यमाने दक्षिणत एत ब्राह्मणा इयं वो धेनुरहिंसं तो यथा० ध्वं। उ

हे॰चा॰प्र॰ र्मवेदीदक्षिणतोगत्वाउत्तरस्यांवेद्यामासन्नांगांप्रतिगृह्णंति। हविःशेषोद्वासनमुभौकुरुतः। ब्रह्मन्
३० स्थास्यामइत्यध्वर्युःसमिधावाधायेत्यूहः। ब्रह्मा देवसवित॰ ओंप्रतिष्ठ तं। आग्नीध्रउत्तरदक्षिणयोः
क्रमेणसमिधावादधाति। याजमानमावर्त्तते। क्रमेणतैस्तैःसन्नहनैःसंमार्ष्टिउत्तरदक्षिणाग्नीस्वेस्वे
अग्नौसंमार्गाननुप्रहरतः। आग्नीध्रोवाक्रमेणानुप्रहरति। भूतानामधिप॰ वेदिर्बर्हिरित्यविकृतं
सकृत्। इध्मसन्नहनयोर्हुतयोरितिवोहः। आग्नीध्रसंमार्गपक्षेआवृत्तिः। उत्करव्यदसनेनास्तिया
जमानं। पृषदाज्याभ्यामनूयाजान्यजतः। अध्वर्युरेवसंप्रेष्यति। वषट्कृतेजुहुतः। तंत्रेणाविकृतं
वैश्वदेववद्याजमानं। वाजस्यमाप्रसवेनेत्याद्युभौप्रतिपद्येते। याजमानमप्यविकृतंसकृत्। समं
जातांबर्हिषीहविषा॰ देवेभिरंजातांदिव्यं॰ छतांयत्स्वाहा। आपिप्रेऽइत्यविकृतंसकृत्। सूक्तवाके ३०

आश्रावणप्रैषाः अध्वर्योरेव। सकृदविकृतं याजमानं। रोहितेन वामग्नि० हरिभ्यां वामिंद्रो० एत
शेनवाः सूर्यो० अग्नीद्गमय अनुप्रहरेत्यध्वर्युरेव। समुद्यमनमनुप्रहरणं क्रमेण। दिवः स्वीलो
वततइतिपर्यायेण। संवदेथामित्याग्नीध्रः। अगा२नग्नीदित्युभयोः। अगतमित्याग्नीध्रः। श्राव
णसंप्रैषोध्वर्योरेव। उभयोः परिधिप्रहरणं। विष्णोः शंयोरित्यविकृतं सकृत्। वितेमुंचामिरश्मी
यज्ञइति च। विवांमुंचामीति केचिदूहमिच्छंति उभौ वैश्वदेववत्सवाजिनेन चरतः स्वे स्वे बर्हि
षि विषिंचन्गृह्णीतः। अध्वर्योरेव संप्रैषाश्रावणे। दक्षिणविहारवाजिनमुपह्वय। यन्मे रेतः
प्रसिच्यते यन्म आजायते पुनः। यद्वामे प्रतितिष्ठति तेन मा वाजिनं कुरुतेन सु प्रजसं कुरुतस्य
ते वाजिन्वाजिभिर्भक्षं कृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि अनेनाध्वर्युरहिताः स

ह॰ वा॰ प्र॰ वैर्भक्षयंति। ततउत्तरविहारस्थमुपहूय सर्वे प्रतिप्रस्थातरहिताभक्षयंति। आमाविशंसिंद्व आगन्ला
३१ यमनीनां। रसेनमेरसंपृणतस्य ते वाजिन्वाजिभिर्भक्षिंकृतस्यमधुमतउपहूतस्योपहूतोभक्षयामि
अनेनमंत्रेण। ततउत्तरस्थस्थाल्लीगतवारुणी निष्का सर्वजितान्हविःशेषान्वाजिनंच प्रतिप्रस्थातामि
न्नाकृत्विजः प्राश्नंति। दक्षिणविहारस्थामामिक्षामध्वर्युर्भिन्नावाजिनंच। वेदोपृथगुभयोर्वै घोर
भिमृशतियजमानः। स्वस्वस्रुचआददाते। उभौवेदौहोता। सस्रुवावाज्यस्थाल्यावान्तीध्रः स्फ्यांच
प्रति० ताग्रेणोत्तरंविहारमागत्यउभौदक्षिणेनगार्हपत्यमतिक्रामतः। स्वेस्वेस्फ्येस्रुचौविमुंचतः
। अग्नेर्वेपिन्नगृ० सुम्निन्यः सु० यत्तधुरिधुर्योपान। अनेन। यदाज्येएषदाज्यानयनं तदाप्रकृ ३१
तिवन्मंत्रः। अध्वर्युरेवपत्नीः संयाजयतिसंपत्नीयमिडांच। उभौप्रतिपत्तिहोमौजुहुतः। हो

त्रावेदौपत्न्यै प्रदीयमानौ यज० वेदोस्योवित्तीस्थोविदेयकर्मणीस्थः करुणेस्थः क्रियासंस्सनीस्थः सनि
तारौस्थः सनेयं। उपस्थास्यमानौ। घृतवंतं० वेदौदत्तां वाजिनं। त्वयावेदिमित्यावर्त्तते। उभौयथेतमेत्य
सारस्वताद्विप्रतिपद्येते। नपार्वणः। नारिष्ठाद्विप्रतिपद्येते। प्रकृतेसमिष्टयजुषीजुहुतः। अग्नेदब्धा
या० दिवः खीलोवइत्यविकृतौसकृत्। यजमानभागप्राशने। इदंहविरित्यामिक्षाभागौतंत्रे
णप्राश्नाति। विभज्यहोतृषदनैर्वेदीअभिस्तृणीतः। उभौप्रणीताविमोकौकुरुतः। पर्यायेणाक्ष
यत्रमार्जनं। आहवनीयोपस्थानंतंत्रेण। उपसमिंधनंभेदेन। वेदयोस्तृणान्यपरस्थआधायोत्त
रस्यामेववेद्यामतिमोक्षाञ्जपति। उभौउपवेषयोः प्रतिपत्तीकुरुतः। यजमानेनसहयज्ञवि
मोकौकुरुतः। कपालानिविमुंचतः। कुंभीपाकपक्षेयाघर्मेकुंभीमित्यूहः। ब्रह्मणःसमिदाधानं

दक्षिण आहवनीय एव। उभयत्र वा। उपस्थानपक्षे सकृदेव। यजमानस्य व्रतविसर्गः। सकृत्सर्योगप
क्षे न पुनरालंभः। यद्येतं प्रतिनिष्क्रामतः। संस्थाब्राह्मणतर्पणप्रैषश्च। संस्थाप्येति वचनात्। संतिष्ठते
वरुणप्रघासाः। अथावभृथः अध्वर्युरेव। उत्तरे विहारेऽग्न्यन्वाधानादि करोति यावदुक्तं। यज०
अवभृथेष्ट्यामस्ये। अग्ने० ममाग्ने० अग्रयज्ञाय० इमामूर्जं यथातिथि। आवभृथं हविः० नव्रतग्र
हणं। न बर्हिराहरणं। वेदं कृत्वा। परिस्तृणीत० नोभावग्नी० कर्मणोवां० यज्ञस्य। सदने० स्फ्यम
ग्निहोत्रहवणीं स्रुवं जुहूमुपभृतं ध्रुवा माज्यस्थालीं वेदं वेदाग्रं वस्त्रयुग्ममुदुंबरशाखां च। नब्र
ह्मवरणं वाचस्पत इत्यादि ब्रह्मणः। पवित्रेस्थो० इमौ प्राणा० विष्णोर्म० यजमानवाचं यच्छ संवि
शंतां० दक्षायवान० प्रत्युष्टं० देवोवः० अच्छि० वसोः० आपोदेवी० ब्रह्मन्प्रो २ क्षि० प्रोक्षयज्ञं० ३२

शुंधध्वं० वाचंविसृज्य। देवस्यत्वा० स्फ्यमादाय। इंद्रस्यबा० सहस्रभृ० स्रुवंच स्रुचश्चसंमृज्या
ज्येनो० शतभृष्टि० अनिशितास्थ० घृताची० प्रत्युष्ट० गोष्ठं० वाचं० चक्षुः० प्रजां० घृताची० प्र
स्क० दिवःशि० पूषाते बि० इदं विष्णु० अदितिर० महीनांप० इषे० ऊर्जे० महीनां० तेजो० तेजोनु०
अग्नि० अग्निर्जि० आज्यमसि० शुक्रम० ज्योति० तेजो० प्रतिहृत्य गार्हपत्यस्योत्तरत आज्यानि
गृह्णाति। सर्वाणि चतुर्गृहीतानि। उपभृति ब्रह्मणस्त्वेत्यादिचतुर्भिः द्विर्वोपभृति। तदाविशेत्वा०
स्रुवीर्यायत्वेति द्वाभ्यां वेद्यां पवित्रे अपिसृज्य। निष्कासमन्यस्मिन्पात्र उद्धृत्य यस्त आत्मेत्यभि
घार्य वेद्या उत्तरे इंसे निष्कासमाज्यानि तुषांश्च तूष्णीं सादयित्वा। नास्ति याजमानं। अध्व
र्युः। आयुर्दा अग्ने० दिमं स्वाहा। शालामुखीये स्रुवाहुतिं जुहोति। आयुर्द अग्न य इदं०
ततो निष्कासंतुषान्स्कन्दः स्रुवमाज्यस्थालीउदुंबरशाखां दधि दर्भमुष्टिं स्फ्यमहतेवा

ह॰चा॰प॰ ससीसमिधश्चादाय। उरुं॰ हि राजा वरुण॰ विधश्चित् चात्वालं गत्वा सर्वे वदंति। अंतरेण चात्वालो
३२ त्करावुदंचो निष्क्रामंति यां दिशं व्रजंति सैव प्राची। शतं ते राजन्॰ मुच्यस्मत्। अपो दृष्ट्वाध्वर्युर्ज
पति। अभिष्ठितो वरुणस्य पाशः। उदकांतमभितिष्ठंति। अपः प्रगाह्य प्राङ्मुखास्तिष्ठंतोवभृथ्ये
नचरंति। दक्षिणतोध्वर्युब्रह्मयजमानाः पत्नी च। उत्तरत आग्नीध्रः। पश्चाद्धोता। मध्ये आसंद्यां
हवींषि। आहवनीयदेशं संलक्ष्याप्सु तृणं प्रास्यति तस्मिन्यजति। होत्रा[illegible]ओदासु देवतासु। वेदेनो
दकमुपवाज्य स्रुवाघारमाघार्य ध्रुवामाप्याय्य। अग्नीदुदकं त्रिः संमृड्ढि संप्रेष्यति। आग्नीध्रः द
र्भान्स्पंद्य च संगृह्य उदकं वाजजिद्वाजं त्वा सरिष्यद्वाजं जेष्यद्वाजिवाजजिद्वाजजित्यायै संमार्ज्म्यग्निंद
कमन्नादमन्नाद्याय। प्रांचमुदकं त्रिः संमार्ष्टि। सप्रधान नमो देवेभ्यः इत्यंजलिं कृत्वा। जुह्वृत्वं॰ उ ३३
पभृ॰ सूयसे॰ नात्क्रमणं न मंत्रः। विष्णोः रूरा॰ यानि। अग्नेरनीकमप॰ मुञ्चरण्यत्स्वाहा। इति

स्रुच्यमाघारयति। अग्नयइदं० नास्त्यनुमंत्रणमिति मातृदत्तः। नास्याक्रमणे। समक्तं० उन्नीत०
सुवीराय० यज्ञेनय० संमार्गतृणानिस्पृश्य उपसंगृह्य कइदं० उभयोः। आश्रा० अस्तु० तिष्ठ। ए
तावान्प्रवरः। मांदेवेभ्याश्रा० बर्हिर्वर्जंचतुरः प्रयाजाः। नोपस्तृतं समानयते। शेषेणध्रुवांनि
ष्कासमुपस्तृतंचाभिघार्याज्यभागाविष्ट्वाव्याख्याते पंचहोतरि। आप्यायतां० माभेर्मा० आ
निष्कानिष्कासाद्विरवदाय। वरुणायानुब्रू० यद्वदा० आश्रा० अस्तु० वरुणंयज। वरुणायेदं०
वरुणस्याहंदे० येंद्रियावीभू० अत्रनारिष्टाञ्जुहोति। उपस्तीर्यकृत्स्नंनिष्कासमवदायद्विरभि
घारयतिद्वितीयाभिघारणेध्रौवसमाप्तिः। अग्नीवरुणाभ्यां स्विष्टकृद्भ्यामनु० अग्नीवरु
णौस्विष्टकृतौयज। अग्नीवरुणाभ्यां स्विष्टकृद्भ्यामिदं० अग्नीवरुणयोःस्विष्टकृतोरहं०

हृ·चा·प्र· यायुष्मा॰ अग्निर्मेतिच। वैश्वानरे हविः॰ अग्नीदुदकंः सकृत्संमृड्ढि। आग्नी॰ स्फ्यवर्जितैर्दर्भैः
३४ उदकवाजजिद्वाजंत्वाससवृद्वाजंजिगिवद्वाजिवाजजिद्वाजजित्यायैसंमाज्म्युदकम॰ योभूतानामधि॰
तव। नास्तिवेदिर्बर्हिः। व्याख्यातेसम्प्रहोतरि। औपभृतंजुहूांसमानीयापबर्हिषावनूयाजौयज
ति। आश्रा॰ अस्तु॰ देवौयजयज। देवायनराशंसायेदं॰ नराशंस्याहं॰ यापश्रु॰ आश्रा॰ अ
स्तु॰ यज। देवायाग्नयेस्विष्टकृतइदं॰ अग्नेःस्विष्टकृतोहं॰ यायुष्मा॰ एतावत्क्रियते। ततोध्व
र्युरुदुंबरशाखयास्त्रुकूस्णनीययादध्नजर्ष्षमभिजुहोतिचतस्त्रभिः। यद्वोमुसलेनचिच्छिदुर्भरह
यायवाराजानःप्रियाण्यंगानि॰ तत्संधध्वमाज्येनोतवर्धयध्वमनागसोअधमित्संक्षयेमस्वाहा व्रीहियवे
भ्यइदं॰ इतिसर्वत्रत्यागः यद्वोमुसलंवाऊच्यृतमचुच्यवुर्नरोयद्वोदुदुऊर्दक्षिणेन तद्वआप्यायतांतद्वो ३४

निस्थायतां देव व्रीहयो यवाः स्वाहा। यद्वस्त्वचं विभिदुर्यज्ञयोनिं यदारुग्णानाम्न्यकृतो वेनथतमना युष्माभिस्त
व्रीहयो यवाः गुप्तमस्कनः स्वानः संधासस्पर मेव्योमन्स्वाहा। अहाद्धरीरं पयसा० मुपहूता युष्माकं स्मआ
नोभजस दस्ति विश्वरूपे स्वाहा। सर्वयवपक्षेव्रीहिपदत्यागेनोह्यं। यद्वोमुलसेन चिच्छिदुर्यवा राजान इति।
तुषैः स्रुचं पूरयित्वा समुद्दे तेहृदयमप्स्वंतः। संत्वा विशंत्वो० नमो वा के विधेम। अप्सु यमारयति। यो भिं
दूनामुच्चरति तूष्णीतमवजिघ्रेणाभक्षयत्स्पृशति वा। अवभृथ निचं कु० रिषः स्पाहि। तुषमप्सु न्य
स्यति। देवीराप एष वो० ब्रूतात्। इत्युपतिष्ठंते। सुमित्रान आप० वयंद्विष्मः इति मार्जयंते। सुमित्रा
न आप० द्विष्म इति दंपती अभिप्रगाह्य शरीरमलमदूरीकुर्वंतौ सह शिरस्कौ स्नातः अन्योन्यस्य पृष्ठे
प्रक्षाल्यतः प्रतीपमा प्लवमानौ गाहेते। दंपती अहते वाससी परिदधाते। अहत वाससौ भूत्वा बहि

?·चा·प्र·
३९

जलमाचम्यतज्जलंपुनःप्रविशतः।अध्वर्युःप्रतिप्रस्थातर्वसीयोनउन्नयाभ्युदुत्येमधुमत्तमागिरस्तोमास
ईरते।सत्राजितोधनसाअक्षितोतयोवाजयंतोरथाइवकण्वाइवभृगवःसूर्याइवविश्वमिद्धीतमानशुः
इतिप्रतिप्रस्थातारंसंप्रेष्यति।प्रस्थाताउदेतप्रजामुतवर्चोदधानायुष्मान्नायउतयज्ञाअसृक्षत।गाय
त्रंछंदोनुसंरभध्वमथास्यामसुरभयोगृहेषु।सकृद्देवोत्काहोतप्रथमान्यजमानप्रथमान्वोन्नयति।वि
ष्णामयति।स्नानांतंसर्वेकुर्वंति।प्रतियुतोवरुणस्यपाशःउदकांतंप्रतियौति।प्रत्यस्तोवरुणस्यपाशः
।उदकांतंप्रत्यस्यंति।औदुंबरीःसमिधोधारयंतःप्रतिप्रस्थातारंपुरस्कृत्यानवेक्षमाणाआयंति।प
रोगोष्ठमार्जयंते।ग्रहणक्रमेणोत्तरवेदिकेसमिधोऽभ्यादधाति।एधोस्येधिषीमहिस्वाहा।प्रथमां।समि
दसिस्वाहा।द्वितीयां।तेजोसितेजोमयिधेहिस्वाहा।तृतीयां।अपोअन्वचारिषं०वर्चसा।सर्वेऔत्तर ३९

वेदिकमुपतिष्ठंते। एवंपत्नीगार्हपत्येसमिधोभ्याधायोपतिष्ठते। अपोअन्व० पयस्वत्यग्नआगमंतांमा
सं०० ततःपरिहितेवाससीअध्वर्यवेदत्तः। उदवसायानुदवसायवाप्रसूतादेवेनेत्यादि० यद्घर्मःपर्य
वर्त्तयदंतान्१०धीतिभिःसह। अग्निस्तिग्मेन० इत्यादिवैश्वदेववत्। सांवत्सरिकपक्षेपौर्णमास्येष्ट्वोद
वसायेत्यादि। यस्यस्मत्येत्यादि समाप्तंवरुणप्रघासपर्व अथनानाबीजविषयेश्लोकः निर्वाप
उर्जंधत्स्वेति प्रतिबीजंप्रवर्त्तते। सर्वेषामवसानेतुतंत्रंप्रत्यभिमर्शनं १ सर्वेभ्योलोष्ठमादायतंत्रंनिर
सनंभवेत्। निरुप्तंप्रथमंबीजंपात्रेन्यस्मिन्नपोह्यतत् २ पवित्रयोर्निधानादिद्वितीयेप्रक्रमोभवे
त्। अभिमर्शस्तयोर्नानासहस्यादुपसादनं ३ यथार्थमूहोगमनएवमेवोपसादनं। अजिनोल्
खलंतंत्रमादिनस्थापितंभवेत् ४ आहूताप्रथमेबीजेहविष्कृदवतिष्ठते। तत्रैवनवरुलबश्वसमा

घातोन्नमनोभवेत् ५ तुषोपवपनंकार्यंबीजेंत्यइतरेषुन। फलीकरणपर्यंतमन्यत्सर्वेषुवर्त्तते ६ सत्ये
वंप्रथमेमंत्राःसप्तत्रिंशत्ततःपरं। अष्टादशावघातोंतेराक्षसाप्यधिकोततः ७ प्रक्षालनंपृथक्पात्रे
तंत्रंनिनयनंभवेत्।पेषणंचाः शवरुंशतेतंत्रमादौकृतंभवेदिति ८ अथसाकमेधाः प्राकृतविहा
रएव।नोदवसानं।महाहविषएवोदवसानसंबंधः।सांवत्सरिकपक्षेचतुर्दश्यामेवोदयात्प्रागे
वारंभः महाहविषएवो[illegible]पौर्णमासीसंबंधात्।अकुलेवाग्निहोत्रं।उदयसमयेनिर्वापप
क्षेकृत्वेतिकेचित् अकृत्वेतिसुवचंसं।पुराप्रातरग्निहोत्रादितिपौर्णदर्व्येस्मरणात्।ओदासुदेव
तास्वग्निमुपवाज्येत्येतस्यगृहमेधीयसूत्रस्यप्रकृताङ्गीकारवत्। दर्भेष्वासीनइत्यादि।साकमे
धैर्यक्ष्ये पुनःप्राणायामादि०आनीकवतेष्यायक्ष्ये वृताएवऋत्विजः।अध्वर्युरुद्धरणादि॥ ३५

नाजस्रउद्धरणं ममाग्ने॰ अद्ययज्ञाय॰ इमामूर्जंयथातिथि॰ साकमेधीयरं हविः। सर्वेषांसाकमेध
संबंधः। द्व्यहंसाकमेधैरितिवचनात् पौर्णमासंतंत्रं। बर्हिः एकविंशतिधेत्येव वेदं। तूष्णीमेवो
पवेषः। उपरिष्टाद्वेदकर्मणःपरिस्तरणस्यवचनात्। परिस्तरणं। कर्मणेवां॰ अष्टौकपालानिश्रो
णिप्रकृतिवत्। निर्वापे। देवस्यत्वा॰ ग्यामग्नयेनीकवतेजुष्टंनि॰ अग्नेनीकवन्हव्य॰ देवस्य
त्वा॰ ग्यामग्नयेनीकवतेवोजुष्टंप्रो॰ नयथाभागं। अभिघारणे। आप्यायतां॰ साग्नयेःनीकवते
जुष्टम॰ तूष्णीमासादनं। यज्ञोसि॰ अयंयज्ञः॰ विहव्य॰ चतुर्होता। अग्नयेनीकवतेनु॰ अग्नि
मनीकवंतंयज। अग्नयेनीकवतइदं॰ अग्नेरनीकवतोहं॰ यान्नादो॰ विरुज्यप्राशित्रं। चतुर्धी
करणं अन्वाहार्योदक्षिणा। नपार्वणः। नबर्हिरनुप्रहरणं। अस्यामेवेष्टौस्विष्टकृदुत्तरंहविरा

सादनोत्तरं वा स्वकाले प्रातरग्निहोत्रं कर्त्तव्यं। सिद्धमिष्टिः संतिष्ठते अथ सांतपनीयेष्टिः तत्र यथा मध्या
ह्ने प्रचारो भवति तथा तत्पूर्वमारंभः। दर्भेष्वासीनो वांतर संकल्पं कुर्यात् सांतपनीयेष्ट्या यक्ष्ये अध्व
र्युः विहरणादि। ममाग्ने॰ अद्य यज्ञाय॰ इमामूर्जं यथा तिष्ठि साकमेधीयं हविः। पौर्णमासं तंत्रं आ
नीकवत् तस्यैव बर्हिः प्रज्ञातं स्थापितं भवति। अत्रासिदादानादि प्रस्तरं परिभोजनीवेदार्थं दर्भांश्च
स्थायाहरति। असिदादानाद्याछेत्तेत्यंतं कृत्वा प्रस्तरं निधाय परिभोजनीवेदत्तृणानि च छित्वा। देव
बर्हिः श॰ सहस्रव॰ शा॰ न सुसंभृता एकविंशति दारुमिध्मं वेदमुपवेषं परिस्तरणं। नोक्षावन्नी॰
कर्मणे वां॰ पात्रासादने कपालस्थाने स्थालीशम्या दृषदुपलाकुटरुम दंतीवर्जं प्रकृतिवत् न ब्रह्म
वरणं नाहं भूपतिः वाचस्पत इत्यादि वर्त्तते। निर्वपणे। मरुद्भ्यः सांतपनेभ्यो जुष्टं नि॰ मरुतः सां ३

तपनाहव्य॰ध्वं। देव॰भ्यांवोजुष्टं प्रोक्षामिमरुद्भ्यःसांतपनेभ्यः। रक्षोनिनयनांतेधृष्टिरसीत्यादिनांगारान्
मुपधायप्रथमेन कपालमंत्रेण ध्रुवासीति मंत्रद्वयं सन्नमति। शूर्पादेवतंडुलान्समोप्योसूयधर्मस्थ
विश्वायुषः। अंतरितं॰ अग्निस्ते॰ श्रपयति। अविदहंत। नाप्यनिनयनं। स्तीर्णवेदिपक्षेन वेदेन
वेदिं॰ स्तीर्णायावेदेः स्तंबयजुर्हरति। देवस्यत्वेत्यादि। उद्धननखननसंमार्जनवर्जं सर्वं करोति।
आनीकवतस्यबर्हिः प्रहरणपक्षेअत्र वेदेनेत्याद्यविकृतं। पुराक्रूरस्येत्यादिसमानमाप्रोक्ष
णामंत्रणात्। ब्रह्माणमामंत्र्येध्मं च प्रोक्ष्य बर्हिरासि स्रुचेत्वेतिप्रस्तरं प्रोक्षति। द्वितीयपक्षेत्व
विकृतेनबर्हिः प्रोक्षणं। शेषनिनयनांतं समानं। ततोब्रह्मणेप्रस्तरदानांतं समानं नबर्हि
स्तरणं। अनूयाजार्थेउल्मकेइत्यादि। नेदमहं॰ सूर्यज्योति॰ तूष्णीमभिघारणं। नतस्मि

॰चा॰प्र॰ स्सीदेति। नेराभूतिः। प्रियेण ना॰ सीदतु इत्यासादनं। प्रजापतिरसि॰ अयंयज्ञः॰ विहव्यं॰ चतुर्होता।
२८ प्रधानेमरुद्भ्यः सांतपनेभ्योनु॰ मरुतः सांतपनान्यज। मरुद्भ्यः सांतपनेभ्य इदं॰ मरुतांऽसांतप
नानामहं॰ वृत्रहाभू॰ अविरुज्यप्राशित्रं। नचतुर्धाकरणं। अन्वाहार्यो दक्षिणा। नबर्हिरनुप्रहर
ति। स्तीर्णमेव रुाफ्यति। गृहमेधीयेस्तीर्णायावेदेस्तंबयजुर्हरतीत्यक्तत्वात्। यां घर्मेराली
मुप॰ पूष्णास्ताम॰ पुनरालंभवर्जं इष्टिः संतिष्ठते। अथगृहमेधीयः अपराह्ने तूष्णीं शाखा
माहृत्य तूष्णीं यजमानस्य सर्वान्वत्सानपाकरोति। सायंऽकृतेग्निहोत्रे गृहमेधीयस्य तंत्रंप्र
क्रमयति। अपूर्व इदं दर्विहोमधर्मकं कर्म। तत्र यद्यत्कर्त्तव्यं तदाचार्यैः कंठतएवोक्तं। दर्भेष्वा
सीनो॰ गृहमेधीयेनयक्ष्ये। अध्वर्युः विहरणं॰ ममाग्ने॰ अद्ययज्ञाय॰ इमामूर्जंयथातिथि॰ २८

साकमेधीयं गृहमेधीयं हविः। नास्ति व्रतं। नापरेण दक्षिणातिक्रामति। नेध्माबर्हिः। परिभोज
नीवेदार्थं दर्भांश्चाहृत्य। वेदोसि येन॰ वेदं कृत्वा तूष्णीं शाखामूलं छित्वा पवेषं करोति तूष्णीं त्रिवृच्छाखा
पवित्रं करोति। पवित्रेण गां दोहयतीति पक्षे अन्यथान। परिस्तृणाति। नोभावग्नी॰ कर्मणे वां॰ यज्ञस्य॰ स
दने· पात्रसंसादनकाले कपालस्थाने महतीं कुंभीं। शम्यादृषदुपलाकुटरुमेक्षणप्रणीताप्रणयनम
न्तीयोक्रवर्जं प्रकृतिवत्। पात्र्यासह तिस्र उद्धरणपात्रीः मेक्षणस्थाने दर्व्युदायुवनाख्यां दर्वीं शाखा
पवित्रमभिधानीं निदाने दोहनमिति। न ब्रह्मवरणं न जपः। वाचस्पत इत्यादि· उभौ ब्रह्मयजमानावु
पविशतः। पवित्रे स्थो॰ इमौ॰ विष्णो॰ न प्रणीताः। संविशंतां॰ रक्षायेत्यादि पवित्रनिधानांतं प्रकृति
वत्। यच्छंतामित्यादि देवस्य॰ भ्यां मरुद्भ्यो गृहमेधिभ्यो जुष्टं नि॰ त्रिः तूष्णीं चतुर्थं अन्वावापसमये

-चा-प्र- पयोनुरोधेनयथेष्टमन्वावपति।इदंदेवानामित्यादिमरुतोगृहमेधिनोहव्यंरक्षध्वं।देवोवइत्यादि।देवस्य
२९ त्वा॰ भ्यांवोजुष्टंप्रोक्षामिगृहमेधिभ्यः।शुंधध्वमित्यादि।नफलीकरणस्थापनं।प्रक्षालननिनयनांतंप्रकृति
वत्।धृष्टिरसीत्यादिस्थालीवत्कुंभीमुपधायमृगूणा॰ प्यस्वेत्यंतेतस्यांतूष्णींशाखापवित्रमुदगग्रमादधा
ति।अभिधान्यादानादि।तूष्णींसर्वादोहयित्वातूष्णींसंक्षालननिनयनांतंकृत्वाश्शूर्पादेवतंडुलान्समो
प्यनोत्पुनाति।घर्मास्थिविश्वायुषः।अंतरितं॰ अविदहं॰ नाप्यनिनयनं।दक्षिणाग्नौप्रतिवेशमोदनं
पत्नीतूष्णींपचति।नवेदेनवेदिं।देवस्यत्वेत्यादिस्तीर्णायावेदेर्लोमभ्यः स्तंबयजुर्हरति।उद्धननखन
नसंमार्जनवर्जंकरोति।पुराक्रूरस्येतिवर्त्तते।प्रोक्षणीरासादयस्रुवंचस्रुचश्चसंमृद्याज्येनो॰ प्रोक्ष
ण्यासादनादिपात्राणिसंमृज्यसंमार्गानग्नौप्रत्यहेनपत्नीं सन्नह्यति।अग्नेगृहपतउपमाह्वयस्व २९

स्यादिवर्त्तते। समानमाप्रोक्षण्युत्पवनात्। आज्यंप्रोक्षणीश्चोत्पूय ध्रुवायामेवगृह्णाति। सुप्रजास्त्वायेत्या
दि। नजुहूपभृतोः। आपोदेवी० ब्रह्मन्प्रो० प्रोक्षयज्ञं० वेदिरसि० स्वधापितृभ्यउं० यजमानप्रा० वेद्यांप्र
ज्ञाते पवित्रे अपिसृज्य। विधृती तूष्णींसादयित्वा ध्रुवासि घृ० ऋषभोसि० योमा वाचा० स्योनोमे० तूष्णी
माज्यस्थाली। एषासदत्सु कृतस्य लोके तांविष्णो० विष्णवसिवैष्णवंधाम प्राजापत्यं। पश्चाद्गार्हपत्य
स्योपविश्य। सूर्यज्योति० शृतस्यहविषः किंचित्सेोर्णदर्व्यार्थेशरंदर्व्यैदायुवनेनोद्धृत्य प्रज्ञातंनिधा
य। स्योनंते सद० तिसृषुपात्रीषूपस्तीर्य। तूष्णीमभिघार्य। आर्द्रोभुवनस्य० इतिकुंभ्यासहोद्वासय
तिसहैदेव। ततस्थालीतस्त्रीनोदनान्पात्रांतरेषूद्धृत्य उपस्तीर्णासु पात्रीषु तस्मिन्सीदेति मंत्रावृत्त्या
क्रमेणप्रतिष्ठापयति। ततअनिष्कासितांकुंभीप्रज्ञातांनिधायतस्यांचरुल्लिप्तमेवदर्व्युदायुवनमव

वा·प्र·
०

धाय। ओदनत्रयंउद्धरणक्रमेणतूष्णीमभिघार्यवेद्यांप्रज्ञातापिसृष्टपवित्राभ्यांहर्योस्त्वावाराभ्यामिति
क्रमेणोत्सूयपवित्रेयथास्थानेन्यस्य। अथवालौकिकदर्भाभ्यांवोत्पुनाति। पवित्रेअपिसृज्यध्रुवांस्रुवं
त्वसादयतीत्याचार्यवचनात्। लौकिकाभ्यासेवोत्पवनंसाधु। देवस्त्वेतिक्रमेणालंकृत्य। प्रियेण० आसी
दंतु। प्रजापतयरुष सर्वतःश्रिताः स० छृयंतां शं० अयंयज्ञः० विहव्यं। चतुर्होता। वेदंनिधायवेद्यंता
न्परिस्तीर्यहोतारमामंत्र्य। ओदास्क देवतास्तु। वेदेनाग्निमुपवाज्य। तत आज्यभागाभ्यांप्रचर्यव्याख्या
ते पंचहोतरि। जुह्वामुपस्तीर्यमाभेर्मासं० त्रिः २ सर्वेषांक्रमेणमध्यमेभ्योवदायपूर्वार्धेभ्योवद्यति
मरुद्भ्योगृहमेधिभ्योनु० अभिघारयतिप्रत्यनक्त्यस्याक्रम्याश्राव्यप्रत्याश्राविते। मरुतोगृहमेधि ४०
नोयज। मरुद्भ्योगृहमेधिभ्य इदं० मरुतांगृहमेधिनामहं० इन्द्रहाभू० त्रयाणामुत्तरार्धेभ्यःस्विष्ट

हुतं द्वितीयाभिघारणेऽप्यौव समाप्तिः। वैश्वानरे हविः प्राशित्रमवदायेडामवद्यति। न यजमानभागं। पर्व
णीअनक्ति। अवांतरेडामवदायोपहूतः पशुमानित्युक्त्वा। पयसाभ्यस्मानिति यजमानेनोक्ते इडा
सीतीडां प्राश्नंति मार्जयंते। प्राशितायामिडायां। तानोदनान्हविर्भोजनार्हेभ्यो मासेभ्यो भोजनार्थमुप
हरंति। प्रतिवेशपक्वस्य पल्यश्नाति। इति गृहमेधीयइडांतः संतिष्ठते ततोदंपत्योरमात्यानामृत्विजां
तत्रैककुंडेनांजनमभ्यंजनं च। मातृभिः सह वत्सान्वासयंति। ततऋत्विगादीनां तत्त्वयर्थं लौकिकेऽग्नौ प्र
तिवेशाख्या ओदनाः अपूपादिव्यंजनयुक्ताश्च पच्यंते। बहुवचनं व्यंजनपरं। तैरन्नैस्तत्प्राह्णेष्वद
नाएतां रात्रिं वसंति। तत अर्द्धरात्रोत्तरं महाहविर्यज्ञार्थं दोहाय अभिवान्यवत्सापावत्सं बध्नाति।
पयसाग्निहोत्रं चेदग्निहोत्र्या अपि वत्सं बध्नाति। अथ पूर्णदर्व्यः पुराप्रातरग्निहोत्रात्क्रीडिनेष्टिप्र

त्वारपर्याप्तकालात्माकृपूर्णदर्व्येणचरंति। गार्हपत्य एव। नाहवनीयप्रणयनं। गार्हपत्यंपरिस्तीर्यतस्य
दक्षिणतः सदनेकरोति। उत्तरेण गार्हपत्यंदर्भान्सं॰स्तीर्यदर्व्युदायुवनसंलग्नंलेपंनिमृज्यप्रज्ञातंनिधा
य। तेषुदर्भेषुस्त्रुवंदर्व्युदायुवनाख्यांदर्वीं आज्यस्थालीसमिधमग्निहोत्रहवणीमुपवेषंसंमार्गदर्भांश्च
सादयित्वा अपरेण गार्हपत्यंदक्षिणातिक्रम्यब्रह्मयजमानौसदनयोरुपविशतः। स्मार्त्तवत्पवित्रे
कृत्वा प्रोक्षणीः सं॰स्कृत्योत्तानानिपात्राणिप्रोक्ष्यस्त्रुवंदर्वीं च संमृज्याज्यं॰सं॰स्कृत्यपवित्रेग्नावाधा
यगार्हपत्यंपरिषिच्यदर्व्यामुपस्तीर्यशरंनिष्कासंचदर्व्यामवधायनिमृष्टंदर्व्युदायुवनलेपंचावधा
याभिघार्य। पूर्णादर्विपरा॰ शतक्रतो। इत्यनुद्धुत्यसमीपवर्त्तिनौऋषभस्यव्यावहारिकेणनाम्नातमु
पहूय। आह्वानोत्तरंप्रतिवचनरूपेतस्यरवतेजुहोति। देहिमेददामिते॰ हरामितेस्वाहा। गार्हपत्येआ ४१

सीनएकज्जुहोति। इंद्रायेदं० तमृषभमध्वर्यवे ददाति। अध्वर्यो पूर्णदर्व्यस्य दक्षिणात्वेनर्षभं ते ददामि। नप्रतिग्र
हमंत्रः। यदा ऋषभः शब्दं न करोति तदा ब्रह्मन्होष्यामीति ब्रह्माणमामंत्र्य। जुहुधीति तेनानुज्ञातो जुहुयात्। त
दा सैव दक्षिणोभाभ्यां। तस्मिन्पक्षे दक्षिणानास्तीति केचित् इति पूर्णदर्व्यः अनुदितहोमिनां तु अग्निहोत्रो
त्तरमेवारंभः। उदितहोमिनस्तु नापकर्षः अवचनात् इष्टेर्निर्वापस्य प्रचारस्य वा उद्यता सूर्येण साकं कालवि
धानात् अपकर्षस्यावचनाच्च स्विष्टकृदुत्तरं हविरासादनोत्तरं वा अग्निहोत्रं होतव्यं। दर्शे घासीन इत्यादि
इध्मायक्ष्ये। अध्वर्युः विहरणं। ममाग्ने० अद्य यज्ञाय० इमामूर्जं यथा तिष्ठि० साकमेधीयं क्रैडिनं हविः।
पौर्णमासं तंत्रं। इध्माबर्हिः। बर्हिषाव्रतं। वेदं। परिस्तरणं। पाणिसंमर्शनादि। पात्रासादने सप्तकपालानि
शेषाणि प्रकृतिवत्। निर्वापे। देवस्य० भ्यां मरुद्भ्यः क्रीडिभ्यो जुष्टं नि० मरुतः क्रीडिनो हव्य० ध्वं। देवस्य० भ्यां

?·चा·प·
४२

वाजुष्टंप्रोक्षामिमरुद्भ्यः क्रीडिभ्यः। शुंधध्वमित्यादि। अग्नीषोमीयवत्सप्तकपालान्युपदधाति। नयथाभा
गं। तूष्णीमभिघारणं। आसीदन्त्वित्यासादनं। प्रजापतिरसि० अयंयज्ञः० विहव्यं० चतुर्होता। मरुद्भ्यः क्री
डिभ्योनु० मरुतः क्रीडिनोयज्ञ। मरुद्भ्यः क्रीडिभ्य इदं० मरुतांक्रीडिनामहं० वृत्रहा० अविरुज्यप्राशित्रं।
नचतुर्धाकरणं। अन्वाहार्योदक्षिणा। नपार्वणः। सिद्धमिष्टिः संतिष्ठते अथमाहाहविषेष्टिः उदवसा
नंवैकल्पिकं। गार्हपत्यस्याहवनीयस्यवापुरस्ताद्वारुणप्रघासिकोत्तरविहारवद्वेदिंकरोति अजस्र
पक्षेत्वाहवनीयस्यैवपुरस्तात्। गार्हपत्यस्यपश्चाद्दर्भेष्वासीनो० माहाहविषेष्यायक्ष्ये अध्व० उद्ध
रणपक्षे आहवनीयात्प्रणयनपक्षे आहवनीयमद्धृत्यपात्रासादनादिकरोति। गार्हपत्यात्प्रणयनप ४२
क्षेजस्रपक्षेचपात्रासादनप्रभृत्येवकरोति। उत्तरेणाग्निंदर्भान्स्तृ स्तीर्येत्यादि आज्यसंस्कारांतंकृ

स्तावेदंकरोति। वारुणप्रघासिकोत्तरविहारवेदिकरणवत् वेधंसांतं कृत्वाउत्तरवेदिकरणादिपूर्णाकुसं
तंकरोति। ममाग्ने० अघ्नथ ज्ञाय० इमामूर्जयथातिथि० साकमेधीयंमाहाहविषंहवि० सान्नाय्याभावा
न्नशाखाहरणं। आमावास्यंतंत्रं। अत्रव्रतग्रहणं। बर्हिः इध्मः विंशतिधेत्यूहः। परिस्तरणं। नोभाव
ग्नी० कर्मणेवां० पात्रासादने द्वात्रिंशत्कपालानि। चतस्रस्थालीः सान्नाय्यामिक्षावाजिनपात्रवर्जि
तानीतराणिवरुणप्रघासवत्। नब्रह्मवरणं। अत्रपवित्रकरणं। निर्वापे पौष्णांतान्निरूप्यतान्व्रीहीन्पा
त्रांतरेउद्धृत्यपुनः पवित्रेनिधाय ऐंद्राग्नंनिर्वपति। अन्वावापांतंकृत्वापात्रांतरेउद्धृत्य पूर्वोद्धृतान्व्री
हीन्शूर्पेआनीयतत्र इंद्राय जुष्टंनि० विश्वकर्मणेजुष्टंनि० ऐंद्राग्नव्रीहिपात्रंशूर्पेनिधायोपसादय
ति। ऐंद्राग्नांतमुक्त्वा। इंद्रहव्यं० स्व। विश्वकर्मन्हव्यं० स्व। प्रोक्षणे। देवस्यत्वा० म्यामग्नयेसवित्रेसर

चा·प्र· स्वत्यैपूष्णोविश्वकर्मणेवोजुष्टंप्रोक्षामिसोमायेंद्राग्निभ्यामिंद्राय।शुंधध्वमित्यादि।ऐंद्राग्नभिन्नानांव्रीही
२ णांअवबाटं॰रक्षइत्यंतंकृत्वाऐंद्राग्नानुलूखले आवपति।अग्नेस्त॰ अवरक्षो॰ वर्षवृद्ध॰ वर्षवृद्धा॰ प्र
तित्वा॰ परापूत॰ पराध्मा ता॰ तानतुषानव भृथार्थंप्रज्ञातान्निधाय।उभयानेकीकृत्यवायुर्वइत्यादिक
रोति।अ॰शवस्तांनेराशिद्वयंसमंकृत्वा।यथाभागंव्यावर्त्तध्वमित्युक्त्वा।इदमग्नयेचसवित्रेचेंद्राग्निभ्यां
चविश्वकर्मणेच।पुरोडाशार्थान्।इदं॰सोमायचसरस्वत्यैचपूष्णेचेंद्रायच।चर्वर्थान्।पूर्ववत्सौष्णाम
पच्छिद्यसहपुरोडाशैयः पिनष्टि।प्रातर्दोहामिक्षावर्जंआएषदाज्यग्रहणाद्वरुणप्रघासवत्।यथाप्रयोगे
नुपूर्ववत्एषदाज्यग्रहणं।सांवत्सरिकेकार्त्तिकीमार्गशीर्ष्योः क्रमेणाषाढीश्रावणीवत्।अभिघारणे
।विश्वकर्मणेजुष्टमभि॰ एककपालधर्माः।आसीदंत्वित्यासादनं।यज्ञाः स्थेतिपंचानां।प्रजापतिरसी ४३

तिसौम्यस्य। योनः कनीय० अपत्तमिंद्राग्नीद्रामुवनान्नुदंता० अयंयज्ञः० पंचहोता। विहव्यं० चतुर्होता। नि
र्मथ्यः। समानमास्रुच्याघारात्। स्रुच्याघारेसमारभ्येत्येतस्यस्थानेअनेनमंत्रेणाघारयेत्। अग्नेवहोत्रंवे
र्दूत्यमूर्ध्वोअध्वरेष्वाऽवतांत्वाद्यावापृथिवीअवस्विष्टकृदिंद्रायदेवेभ्योभवजुषाणोअस्यहविषोघृतस्य
वीहिस्वाहा। अग्नयइदं० वागस्याग्नेयीसपत्न० इत्यूहः। इहइंद्रइत्यादि। प्रचारेऐंद्राग्नांतंवरुणप्रघासवत्।
इंद्रायानु० इंद्रंयज। इंद्रायेदं० इंद्रस्याहं० ऐंद्रियाव्यन्नादो० एककपालेनचरति विश्वकर्मणे। उपांशु।
अनुब्रूहीत्यकस्वैः। विश्वकर्माणं। उपांशु। यजेत्यकस्वैः। विश्वकर्मणइदं० विश्वकर्मणोहं० यान्नादोभू०
अत्याक्रम्याग्नीध्रोबाज्यांश्चतुर्गृहीत्वाजुहोति। सहश्चस्वाहा सहसइदं० सहस्यश्चस्वाहा। सहस्यायेदं० तप
श्चस्वाहा। तपसइदं० तपस्यश्चस्वाहा तपस्यायेदं० स्विष्टकृदादिप्रतिपद्यते। आग्नेयविकाराणांविरुज्यप्रा

हि॰ चा॰ प्र॰
४४

श्रित्रं चतुर्धाकरणं च। अविरुज्येतरेषां। ऋषभः प्रवया दक्षिणा। सहस्र॰ अन्यदविकृतं। देवस्य त्वा॰ दक्षि
णोरुद्वयगां तेनाम्ृ॰ एषदाज्येन न वानूयाजाः। वाजिनयागपार्वणामिक्षाभागप्राशनवर्जं वरुणप्रघास
वत्संतिष्ठते। अत्र यावदुक्तोवभृथः। नसौमिकावभृथातिदेशः। ऐंद्राग्नतुषानादाय। उरुं हि राजा वरु
ण॰ श्वित्। अंतरेणचात्वालोत्करावुदंचो निष्क्रम्य। यत्रापस्तत्र गत्वाप्सु तूष्णीं तुषान्विकीर्यागच्छंति
न समिदाधानादि। तुषप्रतिपादनं चक्रियत इतिवचनात् वरुणप्रघासवत्तुषप्रतिपादनं केचिदि
च्छंति इति माहाहविः॥ अथ तदानीमेव महापितृयज्ञः। तत्र यथोक्तासंपाद्य अस्मिन्यज्ञे
आग्नेयीनैर्ऋतीवायव्यैशानीनां प्राच्यादिसर्वत्र व्यवहारः दिक्संयुक्तकर्माणि च। श्रोण्यंसानां स्र ४४
क्ति व्यवहारः। नास्त्युदवसानं। प्राकृताहवनीयस्याग्रेण संचारः। सर्वत्र देवप्रवादमंत्राख्रिविधाः।

केचनत्र्यंगद्रव्यसंस्कारककर्मांगाः। तत्रदेवपदंनोह्यं। अन्येत्र्यंगप्रधानसाधारणद्रव्यसंस्कारकक
र्मांगाः। तृतीयाः केवलप्रधानद्रव्यसंस्कारककर्मांगाः। उभयत्रदेवशब्दानंतरंपितृशब्दप्रयोज्यः। मं
त्राणांचतुर्थोपिप्रकारउपलभ्यते समवेतप्रकाशकत्वं। यथादेवस्यत्वा० देवान्यज। देवोवः सविता।
इत्यादिषुनोहः। तत्रपूर्वोक्तत्रिविधानांमध्येप्रथमादीनामुदाहरणं। जुहूपभृतोराज्यग्रहणादि।
तत्रनोहः द्वितीयानामुदाहरणं। अन्वाधानबर्हिःपाणीप्रक्षालनवेदिकरणाज्यनिर्वापादीनित
त्रदेवपितृपदंप्रयोज्यं। तृतीयानामुदाहरणं। यथासांगनिर्वापप्रोक्षणावहननपेषणोपधानसंव
पनाधिश्रयणादीनि। तत्राप्युभयंप्रयोज्यं। नतुदेवपदत्यागः। सर्वत्रेत्याचार्यवचनात्। यज्ञोपवीतं
प्राचीनावीतंच। अन्यतरवचनोत्तरं इतरस्यविधानपर्यंतंपूर्वकृतंप्राचीनावीतंयज्ञोपवीतंवाऽऽ

पनीयं अथप्रयोगः। महापितृयज्ञेनयक्ष्ये। अध्वर्युः। विहरणपक्षे प्राकृताहवनीयमुद्धृत्यवेदिंकरोति। अजस्र
पक्षे प्राकृतस्य नोद्धरणं। उपक्रमायाः पैतृक्यावेदेर्दक्षिणतो ब्रह्मयजमानौतूष्णीमुपविशतः। वेदोसियेनेत्य
विकृतेन मंत्रेणवेदंकरोति। इदंतस्मैह॰ यांवोदेवाः पितरश्चरति॰ इतिपितृयज्ञवेदिदेशमभिमृशति। वेदेन
वेदिमितिपैतृकींवेदिंसंमार्ष्टि। देवस्यत्वेत्यादि। पृथिविदेवपितृयजन्यो॰ अपहतोररुः पृथिव्यैदेवपितृय
जन्यै। योमाहृदा॰ द्विष्टंदेवाः पितरः अपहतोररुः पृथिव्याअदेवपितृयजनः अवबाढादेवपितृयजन्या॰
ऋतमसीति पूर्वपरिग्राहः। यज॰ बृहस्पतेपरि॰ गावोदेवाः पितरः सदनानि॰ इमांनराः कृ॰ रिष्यादेत
देवेभ्यः पितृभ्योजुष्टा॰ इमांदेवाः पितरोजुषंत॰ अप॰ व्याञ्छ्रादेवपितृयजंवह। यदुद्धतोजि॰ मनसादेव
पितृयंतः। नखनतिपैतृकींवेदिंकरादिभिः परिश्रयंति। उत्तरस्यांस्रक्तौउद्धारंकुर्वंति। ततोध्वर्युर्दक्षिणा ४५

ग्नेरंगारान्पात्रे गृहीत्वोपयमनीरूपयम्यापरेण गार्हपत्यमुत्तरेण प्राक्कृतं विहारमग्रेणाहवनीयं गत्वा
द्वारेण पैतृकं विहारं प्रविशाग्नेय्यभिमुखो वेद्यां मध्य एव निवपति। स एवाहवनीयोऽस्याभिप्रेतमुपस
माधाय। इममेवाहवनीयं प्राक्कृतौ गार्हपत्यदक्षिणाग्नी चान्वादधाति। ममाग्ने० व्याहृतिभिरन्वाधा
नमिति केचित्। अग्निं गृह्णामि० अद्य यज्ञाय रमतां देवताभ्यः। अत्रापि पितृपदस्यानुषंगं केचिदिच्छं
ति। देवतापदे सर्वत्र। इमामूर्जं यथाति थि० तान्देवान्पितॄन्परिगृह्णामि पूर्वः। अग्नि० साकमेधीयं म
हापितृयज्ञं हवि० वैकृताहवनीयप्राकृतगार्हपत्ययोर्मध्ये तिष्ठंतो जपतः। अंतरा० वो देवपितृसं
सद० ममदेवा अविकृत एव। दक्षिणाग्न्यन्वाधानानंतरं बर्हिराहरणं। बर्हिः समूलमुपमूलं वा।
समूलपक्षे आसिदादाननिष्टपननिधानच्छेदनाल्वाभिमर्शात्मप्रत्यभिमर्शो नानिनसंति अन्या

ना·प्र· दानंकरोति। उपमूलल्लून पक्षेप्रयोगः। देवानांपितॄणांपरि० इदं देवानांपितॄणां। देवस्यत्वा० भ्यांबर्हिर्देवपि
६ तृषदनमारभे। देवेभ्यः पितृभ्यस्त्वोर्ध्वंबर्हिर्भ्यः। देवपितृबर्हिर्मात्वा० याजाताओषधयो देवेभ्यः पितृ
भ्यस्त्रि० अत्रबर्हिरेवछिनत्ति। नप्रस्तरः। नात्तुमितो० देवपितृंगममसि। बर्हिषाव्रतं। देवादेवेषु० अन
हेन। प्रकृताद्राघीयान्। इध्मोदीर्घः स्थूलश्चेत्यर्थः। इध्मेद्वौपरिधी सर्वान्वोपसन्नह्यति। यत्कृष्णा०
स्त्वांविरं शतिधा० द्वौपरिधीतिस्रः समि० चरान्। परिधित्रयपक्षेयथाप्रकृतिमंत्रो। कृष्णोस्या० घ्रा
देवपितृपुर० तूष्णीमुपवेषः। परिस्तरणं। नप्राकृताहवनीयस्य। नोभावग्नी। कर्मणोवां देवेभ्यः पितृ
भ्यः श० गार्हपत्यात्मेतकाहवनीयपर्यंतमुलपराजीस्तरणं। दक्षिणाग्न्यायतनमारभ्यैवोलपराजी
स्तरणमितिकश्चित् तदसंगतं। दक्षिणाग्नेर्गार्हपत्यत्वानातिदेशात् सदनेतुपितृकर्मावेदेर्दक्षिणतः ४६

पात्रासादने स्फ्यं षट्‌कपालं निधानाभर्जनार्थं महत्कपालं स्वर्परमित्यर्थः पात्र्यासह मंथार्थं वारणं
पात्रं मृन्मयं शरावं वा। मेक्षणन सह स्रुशलाका। उदकुंभं शलाकास्तकास्तंबं। योक्त्रपाशित्रवर्जं प्रकृतिव
दितराणि। नब्रह्मवरणं वाचस्पत इत्यादि। अपरेण पैतृकमाहवनीयं दक्षिणातिक्रामति। पवित्रक
रणादि। अत्र न प्रणीताः प्रणयतीति केचित्। तत्र मूलं मृग्यं। पितृयज्ञसूत्राशयस्तु कर्त्तव्यमेव प्रणी
ताप्रणयनं। अध्वर्युर्दक्षिणतः शकटमारुह्य प्राचीनावीती पवान्निर्वपति। उत्तरतो वा यज्ञोपवीती। अ
त्र प्राचीनावीती चेदा सामिधेनी प्रैषात्। प्राचीनावीत्येव। अत्रापि पात्र्यां वा निर्वाप इति वर्त्तत एव त्वं दे
वानां पितृणामसि स० वह्नितमं देवपितृदूतमं। देवस्य त्वा० भ्यां सोमाय पितृमते जुष्टं नि० सोमाय
पितृमत आज्यपक्षे एतस्य न निर्वापः उपांशुयाजवत्। ध्रौवाज्ञतुर्गृहीतेन यागः। अग्निं होतार०

ा·प्र· कुर्वेदेवान्पितॄन्यज्ञि॰ आयंतु देवाः पितरः सुमं॰ यंतुदेवाः पितरो हवि॰ देवस्यत्वा॰ भ्यां पितृभ्यो बर्हिषद्भ्यो
२ जुष्टं नि॰ देवस्यत्वा॰ पितृभ्योग्निष्वात्तेभ्यो जुष्टं नि॰ यमाय मथमित्यस्मिन्पक्षे यमाय जुष्टं नि॰ एवं स
र्वत्र। इदं देवानां पितॄणां। वैश्वानरं ज्योतिरिति पैतृकाहवनीयमेव परस्तात। सोम पितृमन्हव्य॰ पित
रो बर्हिषदोहव्य॰ ध्वं। पितरोग्निष्वात्ताह॰ ध्वं। प्रोक्षणो। देवस्यत्वा॰ वो जुष्टं प्रोक्षामि सोमाय पितृमते
पितृभ्यो बर्हिषद्भ्यः पितरोग्निष्वात्तेभ्यः। शुंधध्वं दैव्याय पित्र्याय कर्मणे देवपितृयज्यायै। अग्नेस्त
नूरसि इत्येतस्य प्राक् प्रोक्षणीशेषेण यवान्संयुत्यावहंति। अग्नेस्तनूरसि वा॰ जनं देवपितृवीतये
त्वा गृह्णामि। अद्रि॰ सद्रं देवेभ्यः पितृभ्यो हव्यं सु॰ देवेभ्यः पितृभ्यः शुंध॰ देवेभ्यः पितृभ्यः शुंभ॰
देवेभ्यः पितृभ्यः शुध्य॰ त्रिष्फलीकृतेषु विभागमंत्रेण षट्कपालमपच्छिद्य पिनष्टीति पेषणस्यास ४८

वधानेन विधानात् प्रक्षालननिनयनोत्तरमेव विभागः न तु पूर्वं। परिभाषायां विभागावसरस्योक्तत्वा
दत्र पुनर्वचनं किमर्थमिति चेत् तत्र चरुपुरोडाशानामुक्तः नधानानां। एतदर्थं पुनर्वचनमिति। यथा
भागं व्यावर्त्तध्वमिति षट्कपालमपच्छिद्य इदं सोमाय पितृमते च इदं पितृभ्यो बर्हिषद्भ्यश्च पितृभ्यो
ग्निष्वात्तेभ्यश्च। ततः कृष्णाजिनादानादि। षट्कपालं पिनष्टि। देवस्य त्वा० भ्यामधि० धिनुहि देवान्पि
तॄन्। दक्षिणार्धे गार्हपत्यस्याग्नीषोमीयवत्। मरुतां शर्ध इत्येतदं त्तेरुपदधाति। उपवेषादानादि।
आ देव पितृयज्ञं वह। ततः दक्षिणाग्नौ प्रथमेन मंत्रेणोत्तानं कपालं भर्जनार्थमेकमुपदधाति। निर्द
ग्ध० भ्रग्रूणामं० प्यस्व। मदंतीरधिश्रयति। पिष्टानि समोप्योत्सूय। तंडुलानुत्पुनाति। षट्कपालमधि
श्रित्य। घर्मोऽसि विश्वायुषः भर्जनार्थकपाले धानार्थं तंडुलानावपति। पुरोडाशस्य प्रथनादि। सर्वत्र

श्रा॰ प्र॰
८

पर्यग्निकरणमुभयत्र क्रमेण तेन तेनाग्निना। अविदहंतश्रपयतेति प्रैषांते। यः कश्चित्परिकर्मी कपाल
एव भर्जयित्वा उद्वासनपर्यंतमुपदाहो न भवति तथा करोति। अपरेणगार्हपत्यमाप्येभ्यो निनीय। ब्रह्मा
णमासंन्न्वव सवस्त्वेत्युत्तरं परिग्राहं पूर्ववत्। बृहस्पते परिगृहाणेति ब्रह्मयजमानयोः पूर्ववदूहः प्रो
क्षणी मरासादः॰ मख्याज्येनो॰ घृताची॰ क्ष्यति देवपितृयज्यायै। प्राशित्र वर्जं संमार्ष्टि। संमार्गप्रह
रणांते। आशासानेत्यादि ममपुत्राइत्येतन्मंत्रांतं लुप्यते। पूषाते बिलमित्यादि करोति। महीनांप॰
मि देवपितृयज्यायै। ऊर्जे त्वि संतं कृत्वा यत्र पत्नीगृहमध्ये उपविष्टा भवति तत्रैवाज्यमवेक्षते। एत
स्मिन्काले पत्नीविहारमध्ये न कस्यापि व्यवायः। तेजोसीत्यादि पैतृकाहवनीये धिश्रयणं। अ
ग्नेर्जि॰ भूर्देवानां पितृणां धाम्ने धाम्ने देवेभ्यः पितृभ्यो यजु॰ व। आज्यमवेक्ष्याज्यं प्रोक्षणीश्चो ४

स्रूयप्रतिहृत्य गार्हपत्यसमीप उत्तरत आज्यानि गृह्णाति। सर्वाणि चतुर्गृहीतानि। प्रकृतिवज्जुह्वां गृ
ह्णाति। ब्रह्मणेस्त्वेत्यादिभिश्चतुर्भिरुपभृति। सुप्रजास्त्वा येत्यादिभिर्ध्रुवायां। भूरस्माकं हविर्देवा
नां पितृणामा० नस्य देवानां पितृणां त्वा देवताभ्यः पितृभ्यो गृ० प्रोक्षणीरभिमंत्र्येत्यादि। ग्रंथिवि
स्रस्येत्यंतेन हिंष्येव पवित्रेऽप्यपि सृज्य। वेदिं तृणैरंतर्धाय शुल्वं स्तीर्त्वा सर्वं बर्हिः सकृद्देवाग्रेषु
गृहीत्वा देवपितृबर्हि रू० सकृद्देवेभ्यः पितृभ्यः। सकृद्देवमंत्रमुक्त्वा दक्षिणस्त्वक्तिमारस्याविधू
न्वन्नस्तृणम्प्रसव्यं त्रिः पर्येति। मुष्टिमात्रं प्रस्तरार्थमवशिनष्टि। यज० ऊर्णाम्रदुस० नं देवेभ्यः
पितृभ्यो जुष्ट० चतुःशिखंडा० शिवा च मे० प्रस्तरार्थं तृणमोर्ध्वं धारयन्नधून्वन्नप्रदक्षिणमग्निं
त्रिः पर्येति। प्रस्तरहस्त एव द्वौ परिधीन् सर्वान्वा परिदधाति। अविकृतमाध्वर्यवं याजमानं च।

हि·चा·प्र· द्विपरिधिपक्षेमध्यमोत्तरौ। समिधावाधायविधृतीनस्तः। उद्धासादनस्थानेतूष्णींप्रस्तरंनिरस्यति। न न्य
४९ याजमानं। प्रस्तरानुमंत्रणंकर्त्तव्यमितिकेचित् नास्मिन्नवसरेस्रुगासादनं। उद्धासनप्रभृतीनिकर्मा
णिप्रतिपद्यते। इदमहमितिपुरोडाशस्य। सूर्यज्योतिषोविभातमहत० स्योनंतइतिपुरोडाशस्य।
तूष्णीमभिघारणमुभयोः। मंत्रेणपुरोडाशमुद्धास्यतूष्णींनिदधाति। यवमयत्वात्। आर्द्रोभुवन
स्यगोपाः शृताउत्स्नातिजनित्र्योमतीनां। इतिधानाः कपालेनसहोद्धास्यचरुवत्। कपालासात्रांत
रउद्धासनमितिकेचित्। तस्मिन्सीदेतिमंत्रोनास्ति। यथाभागंव्यावर्त्तेथां तस्मिन्नेवपात्रेधानावि
भज्याभिमृशति। इदंपितृभ्योबर्हिषद्भ्यः। इदंपितृभ्योग्निष्वात्तेभ्यः अग्निष्वात्तभागंकपालस्था ४९
त्राद्धानिष्काश्यपिनष्टि पूर्ववत्स्थितायामेवदृषदि अंःशवरेठत्साद्यव्यवकिरंतीत्यंतंपूर्ववत्करो

ति।अवधूननप्रभृतिपूर्ववत्करोतीतिकेचित्। सक्तून्कृत्वा।अभिवान्यवत्साया अर्धशरावंदुग्धं
वारणेपात्रेशरावेवानीयतूष्णीं।जिनात्तूष्णींसक्तूनोप्यएकयेक्षुशलाकयानारभ्योपमंथति।शला
कायास्तंबंमूलप्रदेशंमंथंमंथाकारंकरोतीत्यर्थः।तयाशलाकयारज्वाव्यवधानंकृत्वात्रिः प्रसव्यं
दक्षिणाभिमुखोमंथति।दुग्धेसक्तून्मिश्रयति।तन्मिश्रितंमंथाख्यंहविर्भवति।ततः दक्षिणाग्नेः
सधूममेकोल्मुकमादायप्रत्यगानीयापरेणगार्हपत्यंउत्तरेणप्राकृतंविहारमग्रेणोभावाहव
नीयौहृत्वापैतृकाहवनीयस्यदक्षिणतोंतर्वेदिनिदधाति।यथागतमागत्यकपालान्यभिघार्यो
द्वास्य।पात्रांतरेधानोद्वासनपक्षेतदपिकपालमभिघार्योद्वासयति कपालेनसहोद्वासनपक्षे
नकपालाभिघारणं।पुरोडाशमलंकृत्यदेवोवःसवितामध्वानक्तु धानाश्चालंकरोति।यथासर्वा

हि·चा·प्र· धानाः स्निग्धा भवंति तथा। देवस्त्वेति मंत्रं। एकैकश आज्यानि हवींषि विनसादयंति। जुहूं गृहीत्वाग्रेणा
५० हवनीयं गत्वापेत्रक्यां वेद्यामपरेणाग्निं प्रस्तरे मंत्रेण सादयति। यथागतमागत्योपभृतं गृहीत्वोत्तर
तो जुह्वाः सादयति। एवमेव ध्रुवां स्रुवमाज्यस्थालीं च। ध्रुवानुमंत्रणे याजमान ऊहः। ध्रुवासि धर०
स्कपदेवान्पितॄन्वैश्व० एता असदन्० विष्णूनिरु० तत आज्यवदेकैकं हविरासादयति। प्रिये
णेति मंत्रावृत्त्या। प्रजापतिरसीत्येतस्यावृत्तिः। अयं यज्ञः० विहव्यं० चतुर्होता सकृत्। अविकारे
ण। दक्षिणतो हविषां विपरिहरणार्थं स्थलमवशिष्य तद्दक्षिणतोंतर्वेद्येवांजनमभ्यंजनं कशिपू
पबर्हणमुदकुंभं च प्रतिष्ठापयति। अयं वेद इत्यादि निर्वापप्रश्नस्यैतस्य यं तं प्राचीनावीतयज्ञो
पवीतयोर्विकल्पोध्वर्योः। आवाहितासु देवतासु सर्वेषां यज्ञोपवीतं। अत्र सर्वेषां यज्ञोपवीतं। ५०

अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानु० अनूयाजसमिधमवशिष्य प्रणवे प्रणवे पंच पंच समि
ध आदधाति। समिद्धो अग्नि० स्वगा देवेभ्यः पितृभ्य इदं० उरुष्णो० अग्ने देवपितृ इह० आवाहि
तासु देवतासु वेदनाहवनीयमित्यादि। आप्यायतांध्रु० प्रतिश्रुदे वपितृयज्ञः० परिधिद्विलपक्षे
अग्नीत्परिधींश्चाग्निं चेति प्रैषः। त्रिलपक्षे यथाप्रकृति। संमार्गादि प्रवरपर्यंतं प्रकृतिवत्। प्रवरे
प्रत्याश्रावणांते। सीद होतः एतावान्प्रवरः। अग्निर्देव इत्येतस्य लोपः। न देवाः पितरः। मां देवेषा०
र्त्तते। जुहूपभृतावादायेत्यादि बर्हिर्वर्जं चतुरः प्रयाजान्यजति। नोपभृतं समानयते। आज्यभा
गाभ्यां प्रचर्य। विस्रस्य यज्ञोपवीतानि प्राचीनावीता निकुर्वते। आज्यानि हवींषि च विपरिहरंति।
विपरिक्रामंत्यृत्विजः। जुह्वाः पृषतानीलापभृतं दक्षिणतः सादयति। ध्रुवां तयोः पृष्ठतो नीलातयो

हि·त्रा·प्र·
५१

र्दक्षिणतः सादयति। जुहूर्यथास्थितैव। धानाः पुरोडाशस्य पश्चान्नीत्वा दक्षिणतः सादयति। मंथं तयोः
पश्चान्नीत्वा॰ तयोर्दक्षिणतः सादयति। षट्कपालो यथास्थित एव। होताध्वर्युरग्नी अश्वापरेणाहवनी
यं गत्वा दक्षिणतस्तिष्ठंति। ब्रह्मयजमानावग्रेणाग्निमागत्योत्तरत उपविशतः। यथास्थितावेव ब्रह्मय
जमानाविति वा। सर्वे दक्षिणोत्तरभावेन स्वस्वस्थाने उपविशंति। सर्वेप्याहवनीयाभिमुखा एव। जुहूमु
पस्तीर्य। आप्यायतां० प्रति देव पितृयज्ञः० सोमाय पितृमतेनुस्वाश्धा। माभेर्मासं० सकृत्पुरोडाश
स्यावदाय तूष्णीमभिमृश्य धानानां सकृदुपसंगृह्णीतेथ मंथस्य द्विरभिघारयति त्रिः पंचावत्तिनः
यदवदानानि० धानानां मंथस्य च तूष्णीं प्रत्यभिघारणं। एवमुत्तरत्र संग्रहण हविषोरभिमर्शनं प्र
त्यभिघारणं च तूष्णीं। परिधीं स्पर्शोर्णिर्वल्कच्यमाने दक्षिणं परिधिं मध्य परिधौ स्थापयति। उत्तर ५१

सत्वेतमपि। अपरेणाग्निमुदङ्त्याक्रम्य दक्षिणामुखः। आ३स्वा३धा। आश्रावयति। अस्तुस्वा३धा।
आग्नीध्रः दक्षिणत उदङ्मुखस्तिष्ठन् प्रत्याश्रावयति। सोमं पितृमंतं स्वधा। वषट्कृते स्कन्द दक्षिण
पार्श्वे निजुहोति। सोमाय पितृमत इदं० सोमस्य पितृमतो हं० देवपितृयज्ञ० वृत्रहा भू० दक्षिणाग्नि
क्रम्य जुहूमुपस्तीर्य पितृभ्यो बर्हिषद्भ्यो नु स्वा३धा। माभैष्ट मा संविजिध्वं मा वो हिंसिषं मा वस्ते
नोपक्रमीत्। भरतमुद्धरते मनुष्येषु तावदानानि वः प्रसवदास्यामि नमो वो अस्तु मा मा हिंसि
ष्टेति धाना अभिमृश्य सकृदाच्छिन्नानामवदाय पुरोडाशादुपसंगृह्णीतेथ मंथस्य। द्विरभिघार्य
यदवदानानि वो वद्य० नत्तद्आप्या० धानाः प्रत्यभिघार्य तूष्णीं पुरोडाशं मंथं च। उदङ्त्याक्र
म्य पूर्ववदाश्राव्य प्रत्याश्राविते। पितृन् बर्हिषदः स्वधा। पितृभ्यो बर्हिषद्भ्य इदं० पितृणां बर्हिष

गा·प्र·
२

दामहं० वृत्रहाभू० अत्याक्रम्यजुह्वामुपस्तीर्य। पितृभ्योग्निष्वात्तेभ्योनुस्वा२धा। नाभेर्मा० सकृन्मंथादवदा
मपुरोडाशादुपसंगृह्णीतेथधानानां। यदवदानानि० तूष्णींपुरोडाशस्यधानानां। उदङ्ङत्याक्रम्य। पूर्ववदा
श्राव्यप्रत्याश्राविते। पितॄनग्निष्वात्तान्स्वधा। वषट्कृतेजुहोति। पितृभ्योग्निष्वात्तेभ्यइदं० पितृणामग्नि
ष्वात्तानामहं० वृत्रहा० यमपक्षे। यमायानुस्वा२धा। यमं स्वधेति प्रैषौ। यमायेदं० यमस्याहं० अन्नादः
इतिविशेषः। दक्षिणातिक्रम्य। जुह्वामुपस्तीर्य। अग्नयेकव्यवाहनायस्विष्टकृतेनुस्वा२धा। पुरोडाशस्यो
त्तरार्धादवदायधानानामुपसंगृह्णीतेथमंथस्य। धानानामुत्तरार्धादवदायपुरोडाशादुपसंगृह्णीतेथमं
थस्य। मंथस्योत्तरार्धादवदायपुरोडाशादुपसंगृह्णीतेथधानानां। अनेनप्रकारेणस्विष्टकृदवदानंसंप ५२
न्नंभवति। धानानामुपसंगृह्णीतेथमंथस्येतिसंग्रहणवचनात्। अथवायथाश्रुतंत्रिभ्यः सकृत्सकृद

वदाय यजतीति। द्विरभिघार्यनांते ध्रुवाप्यायनं। अथ ध्रौवसमाप्तिः। न प्रत्यभिघारणं। उदङ्ङ्त्याक्रम्या
श्राव्यप्रत्याश्राविते। अग्निं कव्यवाहनं स्विष्टकृतं स्वधा। अग्नये कव्यवाहनाय स्विष्टकृत इदं० अग्ने
कव्यवाहनस्य स्विष्टकृतोऽहं देवपितृयज्यया आयु० अत्याक्रम्य। वैश्वानरे। न प्राशित्रमवद्यति। इडापात्र
मुपस्तीर्य मंत्रेण सर्वेषां दक्षिणार्धादिडामवद्यति। उपसंग्रहणं स्विष्टकृत्। न द्वितीयावदानं न यज
मानभागं। द्विरभिघार्य। पर्वांजनादि० यजमान उहः सुरूपवर्ष० यो देवपितृयाणः पंथा० यज्ञो देवा
न्पितॄनप्येतु० देवीर्द्वैः पितृभिरभिमा० इडायाऽहं देवपितृयज्यया० उपहूतायामिडायां। इडाग
तं मंथमवघ्राणार्थं परिशिष्य। अवशिष्टायामिडायां पात्रगतान्हविःशेषान्संमेलयित्वा निष्पीड्य
त्रीन्पिंडान्कृत्वा तिसृषु स्रक्तीषु त्रीन्पिंडान्निदध्यात्यध्वर्युः। एतत्ते तत ये च त्वामनु। पूर्वार्ध्यायां स्र

वा॰ प्र॰ क्तौ। एतत्ते पितामह ये च त्वामनु। दक्षिणाध्यर्यायाः स्रक्तौ। एतत्ते प्रपितामह ये च त्वामनु। पश्चार्ध्यस्रक्तौ।
५२ यजमानः स्वपित्रुद्देशेन त्यागं कुर्यात्। ध्यानमात्रं न नामग्रहणं। यजमान एव पिंडदानं कुर्यादिति केचि
त्। उत्तरस्यां स्रक्तौ हस्तसंलग्नं लेपं निमार्ष्टि। अत्र पितरो यथाभागं मंदध्वं। अध्वर्युरेव ददाति। ततः
सर्वे उत्तरस्रक्तिद्वारेण विहाराद्बहिर्निष्क्रामंति। ततश्चाग्रेण प्राक्कृताहवनीयमुत्तरतश्चागत्य सहैवा
हवनीयसमीपं सेगच्छंति। सुसंदृशं त्वा वयं॰ ते हरी। इति प्राक्कृताहवनीयमुपतिष्ठंते। आतमितो
रीकारं प्लावयंतिष्ठंति। अक्षन्नमीमदंत॰ हरी इति गार्हपत्यं। अक्षन्पितरो मीम॰ जंत पितरः इति
यथेतं प्रतिपद्यंते। स्वे स्वे स्थाने गच्छंतीत्यर्थः। ततो वशिष्टं मंथं होत्रध्वर्युब्रह्माग्नीध्रयजमानाः क्रमे
णावघ्रेण जिघ्रति मंत्रेण। ततो ध्वर्युरुदकुंभमादाय। अयाविघ्राजनय॰ तन्नूमैरयत। सकृन्मंत्रमु ५२

स्कात्रिः प्रदक्षिणंपैत्तकीवेदिंपरिषिंचन्पर्येति। निधायकुंभंपुनरादाययथेतंप्रतिपर्येतिप्रसव्यमित्यर्थः
। तत्रआंजनादिददाति। आंस्वततर आंस्वपितामह २ आंस्वप्रपितामह २ प्रतिपिंडंत्रिस्त्रिरांजनं। अ
भ्यंस्वततेस्यादित्रिस्त्रिरभ्यंजनं। एतानिवःपितरोवासाऽस्यतोनोन्यत्पितरोमायूढ्वं। मंत्रावृत्त्याप्रति
पिंडंदशांछित्वाददाति। सर्वत्रयजमानस्यपितृपितामहप्रपितामहानामुद्देशः। नमोवःपितरोरसा
यपितरोनमोवो० वसिष्ठोभ्रूयासं। नमोवःपितरःशुष्मायपितरोनमो० नमोवःपितरोजीवायपित
रो० नमोवःपितरःस्वधायैपितरो० नमोवःपितरोमन्यवेपित० नमोवःपितरोघोरायपित० एतैःष
ड्भिर्मंत्रैरुपतिष्ठते। यथापाठंवा। उत्तिष्ठतपितरःप्रेतपूर्वेयमस्यपंथामनुयातापुराणं। धत्तादस्मासु
द्रविणंयच्चभद्रंप्रणोब्रूताद्भागधांदेवतासु। इतिपितृनुत्थापयति। परेतपितरःसोम्या० मदंति। इतिप्र

·वा·प्र·
९४

वाहयति। यंतु पितरो मनसा जवेन। इति पितृन्सरं साधयति। मनोन्वाहुवामहे० सन्वेमहि। इतिति सृभिरुपति
ष्ठते। अक्षन्नमीमदं० हरी। प्रजापते नत्व० रयीणां। इति गार्हपत्यं प्रस्थेत्य। यदंतरिक्षमिति पंक्त्या गार्हपत्य
मुपतिष्ठंते। एतदंतं यदध्वर्युसूत्रोक्तमपि यजमान एव करोतीति केचित्। व्यवछिंदंति परिश्रयणानि
निष्काशयंतीत्यर्थः। परिधीन्परिधीवा यथास्थानं स्थापयति। सर्वे विस्रस्य प्राचीनावीतानि यज्ञोपवी
तानि कुर्वते। आज्यानि विपरिहरंति पात्राणीत्यर्थः। यथाहृतानि क्रमेण तेनैव मार्गेणानीय यथा
स्थानं सादयंति। विपरिक्रामंत्यृत्विजः। येन मार्गेण गतास्तेनैव मार्गेण प्रत्यायंति। ततोन्वाहार्यमा
साद्य प्रतिगृह्य। अनूयाजार्थे उल्मुके अपिसृज्य ब्रह्मन्प्रस्था० ग्नीत्परिधींश्चाग्निं च संमृड्ढि० सर्वपक्षे
यथाप्रकृति। यदुपभृति तज्जुह्वामानीयापरेणाग्निं दक्षिणातिक्रम्याप बर्हिषाव नूयाजौ यजति। ९४

आश्राव्य प्रत्याश्राविते। देवौ यजयज। देवायनराशंसायेदं० न राशंसस्याहं देवय० पशु० आश्राव्य प्र
त्याश्राविते। यज। देवायाग्नये स्विष्टकृत इदं० अग्नेः स्विष्टकृतोहं० यायुष्मान्य० अत्याक्रम्य। वाजवत
व्यूहनादि। परिधि द्विखेयत्तस्यपाथउपसमिहि। यजमानं प्रथत। संस्रावं कृत्वा। न प्रत्यागमनं। नस्रु
ग्विमोकः। नपत्नीसंयाजाः। न संपत्नीयहोमः। नाज्येडा। फलीकरणहोमार्थं अग्रेणप्राकृताहवनीयमु
त्तरत आगत्य। गार्हपत्य दक्षिणाग्निमध्यतोगत्वा इध्मप्रव्रश्चनान्याधाय फलीकरणं पिष्टलेपं चजु
होति। यथागतमागत्य पैतृकाहवनीये सारस्वतहोमादि करोति। न पार्वणः नादिष्ठादिकरोति। नस
मिष्टयजुर्जुहोति। बर्हिः प्रहरणं कर्त्तव्यं। ब्राह्मणतर्पणांता सिद्धमिष्टिः संतिष्ठते। इति पितृयज्ञः।
अथ त्र्यंबकाः। प्राकृते विहारे तंत्रप्रयोगः। आहवनीयं प्रणीय नान्वाधानं। न बर्हिः। परिभोजनी

चा·प्र· वेदंचकृत्वा। परिस्तीर्योत्तरेण गार्हपत्यं पात्राणि प्रयुनक्ति। स्फ्यं पुरोडाशसंख्यया कपालानि। अग्नि
५ होत्रहवणीं शूर्पं कृष्णाजिनं शम्यामुलूखलं मुसलं दृषदमुपलां स्रुवं पलाशपर्णं आज्यस्थालीं कुट
रुं पात्रीमेक्षणं वेदमुपवेषं वेदाग्रं मृत्तंत्तणमयं। तूष्णीं ब्रह्मोपवेशनं। सर्वं तूष्णीमेव पवित्रकरणपात्रा
भिमर्शनाग्निहोत्रहवण्यादानानि। हिर्निर्वपणकाले पुरोडाशसंख्यया अन्वावापसहितांश्चतुर
श्चतुरो मुष्टीन्निर्वपति। उपधानकाले गार्हपत्यस्य दक्षिणार्धे पुरोडाशसंख्यया प्रतिपुरोडाशमे
कैकं कपालमुपदधाति। अंगारानधिवर्त्तयति। मदंतीरधिश्रित्य समोप्य नप्रणीतानयनं। पिंडकर
णां तेकरंभपात्रसंख्यया पुरोडाशान्करोति। अयं यजमानस्य। अयं पत्न्या इत्यादिक्रमेण चिह्ना
नि कृत्वा वेदनां गारापोहनादि करोति भस्माध्यूहनां तं कृत्वा स्रुवं पर्णं च संमृज्य वेदाग्राण्यग्नौ ५५

प्रक्षिप्य दर्विहोमधर्मेणाज्यं संस्कृत्य अंगारापोहनादि। अभिघार्यानभिघार्य वा मृते मृतयोर्मृते
षु वा सर्वान्पुरोडाशानुद्वास्य कपालान्यभ्यज्योद्वासयति। ततः दक्षिणाग्नेरेकोल्मुकं सधूमं गृ
हीत्वा प्रत्यगानीयापरेण गार्हपत्यमग्रतो हरंति ततः यावंतो गृह्यास्मस्तेभ्यः कमकरं० तेरुछे।
यजमानपत्न्यमात्यार्त्विजो गार्हपत्यमुपतिष्ठंते। मृतस्य पुरोडाशान्मृतसहितानाज्यस्थालीं पर्ण
स्रुवं दर्भमुष्टिं समिध उदकुंभमेकोल्मुकं समिंधनानीत्येतत्समादाय उत्तरपूर्वमवांतरदेशं गच्छं
ति। आखुस्ते रुद्र० षस्वस्वाहा। व्रजन्नेवातिरिक्तं पुरोडाशं आखुबिले न्यस्यति। ततश्चतुष्पथं गच्छं
ति। चतुष्पथमुपलिप्य तत्रैकोल्मुकमुपसमाधाय परिस्तीर्य परिषिच्य पलाशपर्ण उपस्तीर्य
सर्वेभ्यः पुरोडाशेभ्यः सकृत्सकृदवदायाभिघार्य। द्विरवदानमपि केचिदिच्छंति। एष ते रु०

वा·प्र·
६
तंजुषस्वस्वाहा। रुद्रायेदं० भेषजंगवेश्वाय० व्यवसाययातु। सर्वेतमग्निमुपतिष्ठंते। सर्वेमास्यास्त्र्यं
बकान्पुरोडाशान्व्यूह्यएकैकंगृह्णंति। अत्रामास्याइतिपुंस्त्वमविवक्षितं। एकैकंपुरोडाशमादाय।
त्र्यंबकंयजामहे० मतात्। सर्वेन्चतुष्पथंप्रदक्षिणंपरियंति। ततस्तानूर्ध्वानुदस्य। भगवरुद्रभ
गस्यवोलिक्षीयेतिस्वकीयंस्वकीयंपुरोडाशंअंतरिक्षादेवप्रतिगृह्ययजमानांजलौसमावपंति। एवंत्रिः
कुर्वंति। यदियजमानस्यदुहिताअविवाहिताचेत्सा विपरीतंमंत्रंब्रूयात्। त्र्यंबकं० पतिवेदनं० धनादि
तामुक्षीयमापतेः। तदातृतीयपरिक्रमणेसर्वान्पुरोडाशान्दुहित्रेसमावपंति। इतिविशेषः। नोचेन्न। सर्व
न्यजमानायेव। तान्सर्वान्पुरोडाशानेकीकृत्यतस्मिन्नेवमूतेअपनह्यक्रोशद्वयात्परतोगत्वावृक्षआ
सज्जति। परोगव्यूतिंवाबध्नाति। एषतेरुद्रभागस्तं० वासामितिसर्वेमंत्रमुक्त्वाश्वासमरुंध्यतिष्ठंति रु·५६

एवंत्रिवारंमंत्रमुक्त्वाश्वासमेव रुंधंति। ततः मृतस्यात्मनश्वमध्ये अपः परिषिच्यप्रवृत्तोनवेक्षमाणा
आगच्छंति। परो गोष्ठेमार्जयंते। ततस्तिस्रस्तिस्रः समिधोगृहीत्वातिलष्यां। आगत्यहस्तपादान्प्रक्षा
ल्याहवनीयेसमिधोभ्यादधाति। एधोस्येधिषीमहिस्वाहा। समिदसिस्वाहा। तेजोसितेजोमयिधे
हिस्वाहा। अपोअन्वचारिषं० र्सेसा। सर्वेआहवनीयमुपतिष्ठंते। एवंपत्नीगार्हपत्येसमिधोभ्याधा
योपतिष्ठते। पत्न्या अपिसमिदाधानस्योक्तत्वात् अवभृथवत्सर्वेषांसमिदाधानं। इतित्र्यंबक
चर्या। अथादित्येष्टिः दर्भेष्वासीनो० आदित्येष्ट्यायक्ष्ये। विहरणं। ममाग्ने० अद्ययज्ञाय० इ
मामूर्जंयथातिथि० ऐष्टंहविः साकमेधीयंवा। पौर्णमासंतंत्रं। बर्हिषाव्रतं। ततस्त्वांत्रयोविं
शतिधा० स्फ्यंस्थाली। शम्यादृषदुपलाकुटर्वन्वाहार्यस्थालीवर्जं। आज्यंप्रणयन्ति। कस्त्वागृह्णा

वा॰प्र॰ तिसत्वागृह्णातुकस्मैत्वागृह्णामितस्मैत्वागृह्णामिपोषायत्वा। अनयात्वागृह्णामि। देवस्त्वासवितो
५८ त्पुना॰ आज्यंदेवाग्नेघग्नेवग्नइमंयज्ञंनयाग्रेयज्ञपतिंधेहित्वामिंद्रोवरुणातिष्टत्रत्वर्ये त्वमिंद्रसवरुणी
ष्यावत्रत्वर्येप्रोक्षितमसि। ब्रह्मन्नाज्यंप्रणेष्यामिय॰ कोवइत्येतस्यस्थानेदेवागातुविदोगातुंय॰ ब
ह्मपूतमसिकस्त्वायुनक्तिसत्वायु॰ निर्वपिदेवस्य॰ ध्यामदित्यैजुष्टंनि॰ अदितेह॰ स्वादेवस्य॰ ध्या
मदित्यैवोजुष्टंप्रो॰ घृतेनचरुश्रपणं। मंत्रेणाभिघारणं। आसीदन्त्वित्यासादनं। यज्ञोसि॰ अयंय
ज्ञः॰ विहव्यं॰ चतुर्होता॰ अदित्या अनु॰ अदितिंयजो अदित्याअहं॰ प्रजनिषीयप्रजयाचपशु
भिश्च। इडभागंब्रह्मणेपरिहृत्यसर्वेप्राश्नंति। चतुर्धाकरणेषु× अदित्याइदं॰।× इदंब्रह्मणइत्येवसर्वान्भा
गान्ब्रह्मणेपरिहरति। अश्वःश्वेतोदक्षिणा। गोर्वा। अयमश्वोमृतस्यपूर्णः॰ अन्यदविकृतं। वरुणा ५८

याश्वग्निति प्रतिग्रहः। नपार्वणः। सिद्धमिष्टिः संतिष्ठते। श्वोभूते पौर्णमासेनेष्ट्वा तदानीं वा उदवसा
यानुदवसाय वा। प्रसूतेत्यादि। यो अस्याः पृथिव्यास्त्वचि निवर्त्तयस्योषधीः। अग्नि० अग्निस्तिग्मे
नशोचिषेति निवर्त्तनं वापनं यथापुरस्तात्। संतिष्ठते साकमेधाः समाप्तं साकमेधपर्व अथ
शुनासीरीयः उदवसानं वैकल्पिकं प्राचीनप्रवणे वैश्वदेववद्विहारः। शुनासीरीयेण यक्ष्य
वैश्वदेववत्प्रणयनं पूर्णाहुत्यंतं अन्वादधाति। पयः पक्षे आमावास्यं तंत्रं द्व्यहकालता। यवागू
पक्षे पौर्णमासं तंत्रं सद्यस्कालता। पयः पक्षे प्रयोगः। ममाग्ने० श्वो यज्ञाय० इमामूर्जं यथाति
थि० शुनासीरीयं हविः। शाखाहरणं। न वत्सापाकरणं। वेदं कृत्वा वेदिः। नोत्करः। उत्करबर्हि
र्वर्जं वैश्वदेववदिध्माबर्हिः। अंतर्वेदि शाखाया इत्यादि। उपवेषोसि० वायवे हविः कृ० सायं दु

चा·प्र· तेग्निहोत्रे इमौपर्णन्वि० प्रातर्दोहायवत्सानपाकरोति। नसायंदोहः। परिस्तरणं। उभावग्नी० प्रातरग्नि
५८ होत्रंहुत्वाप्रागुदयात्तत्रप्रक्रमः। पंचचत्वारिंशत्कपालानि। चतस्रःस्थाल्यः। आमिक्षावाजिनयोरुद्धरण
पात्रचमसवर्जंवैश्वदेववत्। पंचसंचराणिनिरूप्यऐंद्राग्नंद्वादशकपालंवैश्वदेवंचरुमिंद्रायशुनासी
रायपुरोडाशंद्वादशकपालंवायव्यंपयःसौर्यमेककपालं। इंद्राग्निभ्यांजुष्टंनि० विश्वेभ्योदेवेभ्यो
जुष्टं० इंद्रायशुनासीरायजुष्टंनि० सूर्यायजुष्टं० इंद्राग्नीहव्यंरक्षेथां। विश्वेदेवाहव्यं० ध्वं। इंद्रशु
नासीरह० स्व। सूर्यह० स्व। देव० भ्यामग्नयेसवित्रेसरस्वत्यैपूष्णेसूर्यायवोजुष्टंप्रोक्षामिसोमाये
द्राग्निभ्यांविश्वेभ्योदेवेभ्यइंद्रायशुनासीराय। कपालोपधानेपौष्णांतान्युपधायऐंद्राग्नायद्वा
दशकपालानि। वैश्वदेवायचरुस्थालींऐंद्रशुनासीरायद्वादशकपालान्यैंद्राग्नवदुपधायनिरूप्य ५८

मित्यादिप्रातर्दोहं दोहयति। कामधुक्षः० हिवायवेहवि० बकुदुग्धिवायवेदेवेभ्योह० संपृच्यध्वमित्यंतं
कृत्वा एककपालमुपदधाति। संवपनादिप्रतिपद्यते। नामिक्षाकरणं। पृषदाज्यवंत्याज्यान्निगृह्णाति
पशुवत्। उद्वासनादि। पात्र्यां चतुर्धोपस्तरणं। भिन्नपात्रएककपालार्थं। यस्त आत्मेति पयोभिघार्य।
आप्यायतांघृ० सास्तृयायिजुष्टम० तूं हेति पयउद्वासयति। व्याहृतिभिरासादनं। यस्त आत्मेति पयआ
साद्यमानमनुमंत्रयते। यज्ञाः स्वसर्वतः श्रिताः स० छूयंता० आग्नेयविकाराणां। प्रजापतीस्थः सर्वतः
श्रितौस० छूयेता० सौम्यवैश्वदेवयोः। योनः कनीय० अपतमिंद्राग्नीड्स्युनासीराभुवनांनुदंताम० इ
द्रमिंद्रियमितिश्च तस्य। अयंयज्ञः० विहव्यं० चतुर्होता० पंचहोता० निर्मथ्यः। नवप्रयाजाः। ऐंद्राग्नांत
पूर्ववत्संचारः। विश्वेभ्यो देवेभ्योनु० विश्वान्देवान्यज विश्वेभ्योदेवेभ्यइदं० विश्वेषां देवानामहं० याश्रा

श्रा·प्र· णेः सायुज्यं गमेयं। इंद्राय शुनासीराया नु० इंद्रं शुनासीरं यज। इंद्राय शुनासीराये दं० इंद्रस्य शुनासीर
९ स्याहं० यें द्रियाव्यन्नादो० उपस्तीर्य स्रुवेणाद्भिः पयसो वदायाभिघार्य। वायवे नु० वायुं यज। वायव इदं०
वायो रहं दे० यें द्रियावी० जेमानं वा सामयाजिनः। एककपाले नक्षरति। सूर्याय। उपांशु। अनुब्रूहि।
सुश्चैः। सूर्य। उपांशु। यजेत्युच्चैः। सूर्याये दं० सूर्यस्याहं० यान्नादो० धौवालक्ष्णइहीतेनै ककपाल मभिजु
होति। संसर्पोस्यंहस्पत्याय त्वा स्वाहा। संसर्पायांहस्पत्याये दं० द्वादशगवं षड्गवं वा सीरं दक्षि
णा। उष्टारो उष्टारो वा। उष्टारो वोढा महानड्वान्बलिवर्दः। अश्वं श्वेतं सोर्ये। गां वा श्वेतां। तदभावे अजो वा
मेषो वा देयः। इमाव श्वसीराव मृतस्य पूर्णौ सहस्रधारावुत्सावक्षीयमाणौ। तौ दध्रतुः ष्टाधि० ताभ्या ५९
मश्वसीराभ्यामतिं० ब्रह्मणी ब्रह्मणी स्थो ब्रह्मणे वां ऊता घो मामा हासिष्टम ऊतौ मत्ययं शिवो भव

तं। ब्राह्मणाइमा वश्ववसीराव ह्निं संतोयथा० देवस्य त्वा० दक्षिण उत्तानायांगीरसा यानो वरुणायाश्वंता
भ्यामम्तत्व० नवान्नयाज्ञान्यजति। वाज्जिन पार्वणवर्जं वैश्वदेववत्। सिद्धमिष्टिः संतिष्ठते ततः पौर्ण
मासीयागोत्तरं तदानीमेव वोदवसायानुदवसाय वाप्रसूतेत्यादि एकंमासमुदसृजत्० निवर्त्तयामि
जीवसे। अग्निस्तिग्मेन शोचिषेति निवर्त्तनं वापनं यथापुरस्तात् समासंश्रुनासीरीयं पर्व यथाप्र
योगपक्षे प्रति पर्वणि निवर्त्तनमात्रं। वपनं त्वंत एवेति भारद्वाजः। सर्वपक्ष साधारण्येन ह्योत्तमयो
र्वपनमुक्तमाश्वलायनेन। वैश्वदेवादिपर्वसु आंतरालिकव्रतान्युच्यंते। नान्तं वदति। विहितडा
मांसप्राशनादिव्यतिरिक्तं नमांसमश्नाति। ऋतुव्यतिरिक्ते काले न स्त्रियमुपैति। मंचकाद्युपरि ना
स्ते। जुगुप्सेतानृतात्। प्राक्शिराः शेते। मधुमाषाद्यमेध्यं नाश्नाति। ऋतुं विहितव्यतिरिक्तं नांक्ते

चा·म· नाभ्यंक्ते। एतानिव्रतान्याचरेत्। प्रमादादिना एतेषुव्रतेषुलोपोजातश्चेत् व्रातपतीपूर्णाहुतिर्वाकर्त्तव्या
० ।इतिचातुर्मास्यानि अथविहारः पंचहोत्रन्वारंभणीयार्थंदार्शिकिएवविहारः।वैश्वदेवार्थंप्राचीनप्र
वणेदेशेविहारः। तत्रगार्हपत्यस्यपश्चाद्यावदपेक्षितंस्थलमवशेष्य तस्मात्प्राच्यांषड्विंशत्यंगुलेगार्हप
त्यमध्यशंकुंनिहत्यसपादविंशत्यंगुलमितांसार्धविंशत्यंगुलमितांवोभयतः पाशांकृत्वाएकंपा
शंतस्मिन्शंकौप्रतिमुच्य अपरेणमंडलंपरिलिखेत्।सगार्हपत्यः। गार्हपत्यायतनस्यपुरस्तात्
स्केनापिप्रक्रममानेनाष्टौप्रक्रमान्प्रक्रम्यतत्पुरस्तात्षड्विंशदंगुलात्मकेनशम्यामानेनचतुरस्रमा
हवनीयायतनंप्रकल्प्यगार्हपत्याहवनीययोरंतरालंपंचधाप्रोदावासंभुज्यषष्ठंसप्तमंवाभाग
मागंतुकमानीयोभयतःपाशांकृत्वापुनःसर्वांत्रिगुणीकृत्यांत्यभागंतुचिह्नयेत् ततआहवनी ६०

मपश्चात्प्रांतेगार्हपत्यपूर्वप्रांतेचशंकुंनिहत्यपूर्वंत्रिगुणीकृतंरज्वाएकंभागंप्रत्यक्देशेद्वौभागौ
प्राग्देशेकृत्वातयोःशंक्वोःपाशौप्रतिमुच्यलक्षणेनदक्षिणतआकृष्यतत्रशंकुः। सदक्षिणाग्नि
वृत्तस्यमध्यशंकुः। तेनैवचिह्नेनोत्तरतआकृष्यशंकुः। तद्धोतुःस्थानं। रज्जुंव्यत्यस्यलक्षणेनद
क्षिणतआकृष्यतत्रशंकुः। तद्यजमानसदनं। तेनैवचिह्नेनोत्तरतआकृष्यसउत्करः। शम्यामा
नमितांरज्जुंपाशवर्तींकृत्वाआहवनीयमध्यशंकौपाशंप्रतिमुच्यरज्जुंचतुरस्रकोणेनीत्वाधि
कांरज्जुंत्रेधाविभज्यतत्तृतीयांशसहितांक्षेत्रांतर्गतांरज्जुमुभयतःपाशिनींकृत्वादक्षिणा
ग्निवृत्तमध्यशंकौएकंपाशंप्रतिमुच्यइतरेणमंडलंलिखेत्। मंडलस्यदक्षिणार्धेज्यासूत्र
पातेनदक्षिणाग्नेरायतनंभवति। उत्तरार्धमुत्सृजेत्। ततःअपरेणाहवनीयंयजमानमा

वा·प्र· त्रीवेदिंकरोतियावदर्थांतिरश्चीस्यादिति। तत्रयजमानमात्रमानंषण्णवत्यंगुलमितं। तत्रवेदिप्रकारः।
२ कृत्वाद्वादशधारज्जुंयजमानप्रमाणिकां। क्षिप्त्वापंचापरान्भागान्चिह्नंकुर्यात्त्रयोदशे। चतुर्दशपं
चदशषोडशेष्वपिचिह्नानिकर्त्तव्यानि। तांरज्जुमुभयतःपाशांकृत्वाहवनीयायतनस्यपाश्चा
त्यशंकोःपश्चाद्यजमानमात्रेणशंकुंनिहन्यात्। रज्ज्वागंतुकान्भागान्मध्यकूदेशेहृत्वाशंकोः
पाशौप्रतिमुच्यत्रयोदशभागस्थेचिह्नेदक्षिणतआकृष्यचतुर्दशभागांतस्थेचिह्नेशंकुंनिहन्या
त्। एवमुत्तरतः। तेश्रोणी। रज्जुंव्यत्यस्यतेनैवचिह्नेनाकृष्यपंचदशांतस्थेशंकुंनिहन्यात्। एवमु
त्तरतः तावंसौ। अपिवायावदर्थांतिरश्चीमित्युक्तत्वात्। चतुःषष्ट्यंगुलमितापश्चात्तिरश्चीअ ६१
ष्टाचत्वारिंशदंगुलमितापुरस्तात्तिरश्चीपूर्वोक्तप्रकारेणसन्नताभवति। वैश्वदेवेत्वयमेवप

स्त्राग्रयणीयः इतिवैश्वदेविकोविहारः अथवारुणप्रघासिकोविहारः गार्हपत्यात्प्रणयनमथा
वाहवनीयतः वारुणप्रघासकर्मण्येवंतत्रप्रकल्पना १ पदंपंचदशांगुल्यः प्रक्रमैरष्टभिर्भवेत्
अंतरालंतदन्यच्चवैश्वदेविकवद्भवेत् २ गार्हपत्यगृहात्प्राचीरेखांदीर्घांलिखेत्ततः। गृहादरत्नि
मात्रेचरेखायांकीलकंन्यसेत् ३ ततोरत्निद्वयेन्यच्चतस्मादन्योर्द्वयोर्द्वयोः षडरत्निमितांरज्जुमा
दावंतेचपाशिनी ४ कृत्वांतेष्टांगुलन्यूनारत्निद्वयनिमित्ततः कर्षणायनिबध्नीयात्पाशंशंकौ
चतुर्थके ५ प्रतिमुच्याथमूलस्थपाशंशंकौद्वितीयके। कर्षेच्चिह्नेनतांरज्जुमुदग्दक्षिणतः क्रमा
त् ६ चिह्नेकृत्वातयोर्दीर्घांतिर्यग्रेखांविधायच प्राच्यास्तस्यास्तत्संयोगपार्श्वयोस्त्यजेत्स्थ
ले ७ षडंगुलानिसार्धानिदक्षिणेचोत्तरेतथा। चिह्नाभ्यांलक्षयेदंसौवेद्योरुत्तरदक्षयोः ८

गा·प्र·
२

दक्षिणांसादुत्तरस्याउत्तरांसंप्रकल्पयेत् चतुःषष्ट्यंगुलैश्चाथतयोर्मध्यंतुचिह्नयेत् ९ दक्षवेदेरु
त्तरांसाद्दक्षिणांसंप्रकल्पयेत् अरत्निद्वयमानेनतयोर्मध्यंतुलांछयेत् १० व्यत्यस्यपाशौतद्वच्च
वेद्याःश्रोणीप्रकल्पयेत् समेप्राच्यावुभेदीर्घेचतुरस्रेविधानतः ११ नतिर्यक्केतयोःसाम्यंसा
म्यंश्रोण्यंसमध्यगं १२ वैहृतस्त्वनयोर्बाहुःसंस्तवोप्युपपद्यते प्रथमेनचतृतीयेनरज्वाःपाशौवि
मुच्यतां उदग्दक्षिणयोःकर्षन्नेरखांकुर्यात्तुपूर्ववत् १३ तस्याःप्राग्भागयोःशम्यामानेद्वेचतुरस्र
के विहारेचोत्तरवेद्यांचतुरस्रातुवेदिका १४ शम्ययोत्तरवेदिंतुमीत्वायतनमेवतु दक्षिणेचतुर
स्रंतुचात्वालश्चोत्तरोत्तरात् १५ गार्हपत्याप्रणयनेविहारोयंप्रदर्शितः पूर्वोनलाप्रणयनेवि
हारःपरिदृश्यते १६ वैश्वदेविकवत्कुर्याद्विहारंपूर्वमेवतु ततआहवनीयाच्चप्राचीरेखांतुपू ६२

र्ववत् १७ कृत्वाथाहवनीयस्यप्राग्भागेशंकुमारवनेत् सएवप्रथमस्तस्मात्ततोन्येपूर्ववन्मताः १८
विहारःपूर्ववत्कार्योदार्शिक्यौवापिवेदिके महाहविषिकेचैववेदिःपक्षद्वयाश्रिता १९ पुरस्तादेव
तांकुर्यात्षंकूंश्चतुरआदिशेत् केषांचित्साग्नुकीचेष्टासापिचाव्यवधानतः २० तैःशंकुभिःक्रि
यतेषडरत्निदैर्घ्यमानतः। चतुस्त्र्यरत्निमानेनतिरश्चीपश्चिमेपुरः २१ तृतीयेप्रथमेशंकोरज्वा
कर्षणतोभवेत् श्रोणीद्वयंपूर्ववच्चशंक्वोरंसद्वयंभवेत् २२ इतिषड्भिःपरिगृहीतोवारुणप्र
घासिकोविहारः प्रयोगवैजयंत्यांतुउभेवेदीपाश्नुक्यावेवदार्शिक्यावेववा यदादार्शिक्योतदा
यावदर्थेतिरश्च्यौआयतनोत्तरवेद्यविरोधेनोभयोरल्पमेवसन्नमनं तेचवेदीपृष्ठ्यासूत्रस्य
दक्षिणतोदक्षिणा उत्तरश्चोत्तरा यत्तुउत्तरापाश्नुकीदक्षिणादार्शिकीतिबोधायनकात्याय

·प्र· नवैरवानसैरुक्तं तत्सूत्रविरुद्धं इतिकृतं तदयुक्तं अथपृष्ठ्यासूत्रस्योत्तरएवोत्तरात दक्षिणतो द
क्षिणेति। तद्वाङ्कुसंस्तवस्यानुपपन्नत्वादनादृतंदीक्षितैः अथमहापितृयज्ञविहारः तत्र दक्षिणा
ग्निमध्यदिक्स्त्रत्यावेदिमध्येनवाप्राकृताहवनीयस्यक्तिभेदोनभवति तथाप्रक्रममहत्वेनप्राकृत
विहारः कर्त्तव्यः तत्र दक्षिणाग्निमध्यशंकोः समंततश्चतुरस्रंविधायमध्यशंकोरज्वाः पाशंनि
धायतांरज्जुमाग्नेयकोणचिह्नादाग्नेयांनयेत्। सामहापितृयज्ञवेदेः पृष्ठ्याभवति। दक्षिणाग्न्या
यतनास्परिश्रयणाद्यर्थं किंचिदुल्लंघ्य त्क्कातत्रपृष्ठ्यासूत्रशंकुंनिहन्यात् ततआग्नेय्यांतस्मिन्ने
वसूत्रेचतुररत्निमितिशंकुः तौमध्यशंकुनाभ्यांशंकुभ्यांचतुरस्रप्रकारेणचतसृषुदिक्षुस्रक्ति
चतुष्टयंकार्यं विदिक्षुमध्यानिभवंति। एवंयजमानमात्रीचतुररत्निमितादिक्षुकोणवती किं ६२

चितसन्नतामहापितृयज्ञवेदिर्भवति। तस्यांमध्य एवाहवनीयायतनंचतुरस्त्रकं कर्माणिस्वभावतः
सिद्धा एव प्रागादिदिशो ज्ञेयाः। दक्षिणकोणंदक्षिणेन ब्रह्मयजमानयोःस्थानं। प्राक्पश्चिमकोण
योरंतरालंत्रेधाविभज्यपूर्वतृतीयभागेस्तंबयजुः तत उत्तरतोद्विपदउत्करः पश्चिमतृतीयभा
गेप्रोक्षण्यासादनं पश्चिमकोणादुत्तरतोहोतृस्थानं तत्पुरतोध्वर्योः इतिपैतृकोविहारः इ
तिहिरण्यकेशिसूत्रानुसारिमहादेवसोमयाजिविरचितश्चातुर्मास्यप्रयोगः समाप्तिगमत्
ग्रंथ १४०० श्लोकाःसप्तचगायेइत्येतस्यहिरण्यकेशीचातुर्मास्यप्रयोगपुस्तकं शके १७०६ पोषवद्य ११ भौमवासरे